
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M2427 विषय वेदांग

नाव साल्यम छंद प्रयोग

लेखक/लिपीकार अनंत देव

पृष्ठ 48 काळ ~~पूर्ण~~/अपूर्ण

॥ श्रीस स सं स्छाप्रयोगाध्अनंतदेववल्लेतालिखितस्तत्स्यदमारं स्पत्रं ॥

॥ श्रीगणपतये नमः ॥ अथ गृह्याग्न्युत्पत्त्युत्तरं प्रथमदर्शपूर्णमासेष्टेर्वार्षिकसप्तपाकयज्ञानां कर्तव्यत्वाद्दर्शपूर्ण
मासोत्तरं कस्यचित्पाकयज्ञस्य प्राप्तौ तस्यैव कर्तव्यत्वात्। सप्तपाकसंस्था उच्यंते। तत्रादौ श्रवणाकर्म। इदं श्रावण्या
मेव कर्तव्यं। तत्रैवाहकरणलोपश्च वा। न गौणकालः। आवश्यकमपि सकृदेव करणमिति केचित्। अन्ये तु गृह
शपाकयज्ञानां प्रसङ्गमात्र इति मन्यंते। एतस्य मूलमनंतदीक्षितपरिशुद्धकारिकायां। एते वै सप्त वर्षेपि पाक
यज्ञा नित्या एव। संस्कारा नियताः सेते ब्राह्मणस्य विशेषतः इति। अंगिरोक्तपंचविंशतिसंस्कारविधायक
ग ६ वाक्ये नियता नित्या इति प्रयोगरत्नकारव्याख्यानात्। पंचविंशतिसंस्काराणां नित्यत्वं तेषूक्तानां परिगण
नात्। केषांचिदकरणे प्रायश्चित्तदर्शनात्। अत एव पाकयज्ञानां संकल्पवाक्ये नित्यविधिप्राप्तममुकक
र्मेति नित्यपदोल्लेखं स्तरेव स्मरति। एवं चैतेषां नित्यत्वेन कर्तव्येपि अवरोहणहैमंती सर्पाणां बलिरयं
काः। इत्यनेन तथा स्मृत्यर्थसारवचनेन वर्षेपि त्यक्तुं शक्यते इति। एकानां सर्वेषां पाकयज्ञानां मलमासे नि दावनुष्ठा
षेधउक्तः सप्रथमारंभविषयः। एतेषां द्वितीयाद्यनुष्ठानं तु मलमासादावपि कर्तव्यमेव। तदुक्तं दत्तमधौ। न ३
पार्वणे श्राद्धाग्रयणं संध्योपासनमेव च॥ अग्निहोत्रं पाकयज्ञानन्यानपि मलिम्लुचे। कुर्वन्नित्यानिक १

मी। गिन शारंभमिति स्थितिः। बृहस्पतिरपि। आरंभो दर्शपूर्णमास्योरग्निहोत्रस्य चादितः। प्रतिष्ठां च कर्माद्या
मलमासे विवर्जयेत्। इति। तथा चौउपनाप्यकारिकापि। आधानादि यत्तु कर्मणां मलमासादौ कर्तव्य
निषेधकं मत्स्यपुराणवाक्यमुदाहृत्य यत्तु कर्माणि दर्शपूर्णमासाग्निहोत्रादीनि तान्यपि प्रथमानीति
व्याख्यातं। अतः प्रथमानामेव प्रतिनिषेधः। पिंडपितृयज्ञस्तु प्रथमोपि कर्तव्य एवेति तस्यैव परिसारे।
आग्रयणप्रथमारंभस्तु न कर्तव्यः। कर्तव्यो वेति पूर्वोक्त वृद्धभट्टीयपरिलिखितवचनान्न कर्तव्यः। प्रथ
माग्रयणस्य शरदृतये विशेषः। प्रायश्चित्तदर्शनाच्च। कर्तव्यत्वमपि निर्णयामृते मैत्रेयसूत्रे मा
सद्यः सममेध्यकराशिसंक्रमेण तादृशस्तत्राद्यो मलिम्लुचः। अंहसस्पः। पार्वणोष्य ग्निहोत्रहोमोपय
न संध्योपासन पार्वणस्थालीपाकश्चेती मान्यन्या। नैमित्तिकानि हापयेदिति स्मार्यते। यत्तु व्यासवचनं॥
श्रौतस्मार्तक्रियाश्च द्वादशोमासि कीर्तिताः। त्रयोदशोनुताः सर्वाः राक्षसाः परिकीर्तिताः। तत्का
मेष्ट्यादिविषयं। तदुक्तं गृह्यपरिशिष्टे। अवषट्कारहोमाश्च पर्व चाग्रयणं तथा॥ मलमासे
पि कर्तव्याः काम्या इष्टीश्च वर्जयेत्। अवषट्कारहोमाः अग्निहोत्रोपासनवैश्वदेवाद्याः। तथा
पर्वहोमश्चाग्रयणं संध्योपासनमेव च॥ इत्यादिवचनाद्गृह्याग्न्युत्तरस्तु उत्तरं प्रथमाग्रयणप्रारंभः
ए।१

२ कर्त्तव्य इति। एवं चैवंविध वचनेभ्यः प्रथमाग्रयणस्य पार्ष्णिक प्रारंभ प्राप्ता वपि सगतिकागतिक भेदेन
व्यवस्था माधव निर्णयामृत स्मृत्यर्थसारादि सर्वग्रंथेषु। एतेन दुर्भिक्षादौ पुराणधान्याभावे अगति
कत्या मलमासादाव प्यंप्रथमाग्रयणारंभः कर्त्तव्य एवेति। मलेन न्यगतिं कुर्यान्नित्यां नैमित्तिकीं
क्रियामिति शुचिः पवित्रपाणिः कर्मांगं द्विराचम्य तीर्थेन प्रविश्योपात्तनस्य पञ्चालुरोहमविस्मकु
रा पाणिः प्राणानायम्य देशकालौ संकीर्त्य मम सकुटुंबस्य पत्नीनां चेरोग्यविवाराणास्य शस्त पारश्च यदास
श्रीमस्नेय्वरप्रीत्यर्थं नित्यविविचितनांस्वकीयगीकरिष्ये इति संकल्प्याग्निध्यानांते सर्पिषंरयं ना
त्यय वद्गुष्यंते मिं चतुर्धारं चतुरव्येण स्रुतनीमाग्निं कुसुरोने नाग्निमारत्यायौज्येन याजिनरेतताश्च
मार्द्रयेयाराादिसमिद्धय मन्त्रापाश्चैवममस्सिसमूहनादि पात्रासादने विशेषः। दर्शियन चरुस्थालीं
कुसुभ्रमर्घं तपालं अनलाधानार्थं शरवद्वपं संवासाचीं चस्तलीता नामेन प्राहुत्वमीमिति द्वे
वचनाच्च द्वितीयाद्यनुष्ठानस्य कर्त्तव्यत्वात्। पुराणधान्यसत्त्वेपि साधुरेव। पूर्वोक्तकरणाच्छ महीयलि
खितवचनादिति मलमासादौ पाकयज्ञानां कर्त्तव्याकर्तव्यविचारः। एतच्च प्रवणाकर्म अस्तमयप्र २

भवति तत्र तत्कर्मपर्याप्तव्यापिन्यां केवलास्तमयमात्रव्यापिन्यां वा कार्यं। एवं पर्वणि याः कास्तु आवर्त्तिना
पूर्वसंध्योः प्रकृतस्तु स्नानानंतरं संधिदिन एवानुष्ठानं वदंति॥ सर्वविकृतीनां प्रकृतिकाल एव सद्यस्काल
त्वं चेति। एवमुक्ते दिने प्रातरौपासनं कृत्वा प्रथमप्रयोगोक्तस्थंडिले एव गणपतिपूजनादि वृद्ध्यन्तं
कृत्वा दिनैव यवानां व्रीहीणां वाग्नौ भर्जनेन धानाः कृत्वा तथैव रूपैः सक्तुकान्निर्वंकफले रौप्यपर्ये व
लिनिक्षेपसाधनभूतां। निर्वंकफलत्व क्षोद्रवांदर्भानपि संपाद्य तदुभयं क्वचिदुन्नतप्रदेशे न वेदिकोपे
।निधाय वल्यर्थं आज्यं शुद्धदर्व्यां परिगृह्य यवानामेव व्रीहीणां वाग्नौ भर्जनेन धानाः कृत्वा पात्रद्वये स
मन्नं हुंकृत्य एकं भागं व्रीहीकिं कसर्पिषाभ्यज्य द्वितीयमनक्तमेवेति। ततः अन्तान्क्तानां धानानां पा
त्रद्वयं पुरोडाशश्रपणयोग्यमेकं कपालं शरावद्वयं पात्रीं प्रास्तृतं भूर्जं भिन्नदूर्वीहस्तपल्लवं शम्यां
मदंतीमिक्षणमारायपात्रं चेति संपाद्य श्रौतवत्तूष्णीं वेदिं कृत्वा कस्यचिद्यज्ञियकाष्ठस्यां मंचक
मुपवेषं च कृत्वा धानानां पात्रद्वयं कपालं प्रास्तृतं वेदिं तानि पात्राणि वेदेरूपवेषौ चेति। सर्वं प्रज्ञातं
निदध्यात्। ततः सायमुपासनं कृत्वा शुचिः पवित्रपाणिः कर्माङ्गं द्विराचम्य तीर्थेन अर्कसोपा
सनस्य पश्चात् कुशेषूपविश्य कुशपाणिः प्राणानायम्य देशकालौ संकीर्त्य मम पुत्रपौत्रादीनां च

३ रोगनिवारणसमस्तपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं नित्यविधिरूपं श्रवणाकर्म करिष्ये इति संकल्प्या ३
ग्निध्यानांते समिद्द्वयं चयं वादाय चक्षुष्यंते ग्निं चतुर्वारं चरुं द्रव्येण च्युत सोमाग्निं पुरोडाशेनाग्निमा
शय्याज्येन वाजिनं देवताधानाद्रव्येण शेषेण सादि समिद्द्वयमग्नावाधाय परिसमूहनादि पात्रासादने
विशेषः। दक्षिणेन चरुस्थालीं पुरोडाशार्थं कपालं भक्ता। अनक्ताधानार्थं शरावद्वयं संवापपात्रीं चरुस्थ(?)
त्या वामे नेप्रोक्षणीमिति द्वंद्वं आसादयेत ततः दर्व्यादिन हविष्यं तं प्राकृतान्यासाद्य ततो दक्षिणेन शूर्पं पुरो
६वी डाशस्य पृथक् निर्वापपक्षे शूर्पद्वयं वामेन कृष्णाजिनं चासाद्य दक्षिणेन वामेन स्यादि उलूखलं मुसलं
दृषदुपलां शम्यां मदंतीं वेदमुपवेषं नेक्षणामान्यायपात्रं चेत्यासादनक्रमः। चरुस्थाल्यादि वर्हिष्या
सादनांते कपालं शूर्पं कृष्णाजिनं शम्यां उलूखलं मुसलं दृषदुपलं वेदं पात्रीमिक्षणं मदंती भशायपात्रं
उपवेषं इत्यासादयेत केषांचिन्मतं। अस्मिन्क्रमेपि कपालेन सह भक्तानक्ताधानार्थं शरावद्वयमा
सादयेत्। ततः पूर्वोक्तेनानेन क्रमेणवा पात्राण्यासाद्य प्रोक्षणीपात्रमुत्तानं कृत्वेत्यादि पूर्णपवि
पंचानां २ त्रे निधाय पुरोडाशदेवतानां व्रीहीन्(?) चतुरश्चतुरो मुष्टीन्निरुप्य तत्संख्ययातूष्णीं च प्रोक्ष्यावघाता
दि तत्सपात्र्यां तंडुलानोप्य प्रक्षाल्य पंचधा विभज्य विभागचतुष्टयमेकीकृत्य पंचमं संस्थाप्य

पुरोडाशार्थं पंचमभागस्तस्य पेषणार्थं उक्तविधिना । जिनादानादि कृत्वाजिनस्थपिष्टावेक्षणांतं
स्वयं कृत्वा पत्न्या द्विनोपेषणादि कुर्यादिति कारिकाकारोक्तपक्षः । यद्वा पुरोडाशस्य पृथगेव निर्वापः
पुरोडाशार्थमन्यस्मिन्कृत्वा निर्वपणं पेषणं पृथगित्यनंतरं द्वीयग्रंथेन कथनात् । केचित्तु पुरोडाशस्य पृथ
गेव निर्वापं कुर्वंतीति कारिकाभाष्यमतात् । एवं ग्रंथेन क्रमेतेन पृथक्पुरोडाशनिर्वापपक्षे आग्रयणे
स्य प्रयोगः । स्थालीपात्रनिधाने स्थालीपर्यासादितशूर्पद्वयमध्ये प्रथमशूर्पे पवित्रे निधायाग्नेयचर्वर्थं
षोडशवारं तण्डुलान्निरुप्यापरश्शूर्पे पवित्रे निधाय पुरोडाशार्थं चतुर्वारं तूष्णीमेव निरुप्य ततश्चर्व
र्थं निरु[illegible]प्तसु पवित्रे निधाय निर्वापसंख्यया तण्डुलान्प्रोक्ष्य ततः पुरोडाशीयानपि तथैव प्रोक्ष्य पूर्वं
चर्वर्थानामवघातादि प्रक्षालनांतं कृत्वा चर्वर्थं संस्थापयेत् । ततः पुरोडाशार्थानामपि अवघा
तादि प्रक्षालनांतं कार्यमिति ग्रंथेनोक्तः पक्षः । एवं सत्यपि मतद्वये कारिकोक्तो हविर्द्वयस्य सहनिर्वाप
पक्षः श्रेयान् । पुरोडाशस्य पृथङ्निर्वापपक्षे पेषणादि कृत्वा पुरोडाशं श्रपयेत् । पेषणश्रपणात्र
कारस्तु श्रौतेऽनुक्तः स स्मार्तेन तूष्णीं कर्तव्यः । यथा तण्डुलप्रक्षालनोत्तरं कृष्णाजिनमादायोलूख
स्त १ भावेपि यत्रोपोद्धतिः कुत्रचित्स्वेदरोत्रिरवध्योर्ध्वग्रीवं बर्हिष्यद्विरासनं पात्राणामुत्तरतः

प्रतीचीनग्रीवमुत्तरलोमास्तीर्यैकं दृषदं तामुपसमस्यति वामहस्तेन । जिनमनुत्सृजन् सर्वत्र तस्मिन्नुद-
गग्रां शम्यां निधाय पूर्ववन्नुत्सृजन् सर्वत्र । तस्यां दृषदमत्यादधाति । दृषदुपलां निधाय ततः पुरो-
डाशार्थं तंडुलभागमपि दृषदुपदृषदि चतुर्वारं तंडुलानधिवपति । हस्तद्वयेन प्राचीमुपलां प्रोहति । त-
तः प्रतीचीं ततो मध्यदेशे धारयति । ततः संततं पिनष्टि । ततः प्राचीमंततोनुप्रोह्य रक्षा । जिने पिष्टा-
निपस्कंद्य ततः रक्षा । जिनस्थं पिष्टमवेक्ष्य पत्न्या दास्या वा तंडुलरोषं दृषदो प्यसम्य स्पषयेत् । त-
तः स्वयमग्नौ दक्षिणाग्ने स्थालीं निधायोपवेषं गृहीत्वा तद्धीम भिमं च्यायतनमध्यं वोप-
वेषेणोपासनात्स्वं वा पंगारोद्धृत्य रक्ष्यतयोरेकमायतनाद्बहिः वायव्ये निरस्याप उपस्पृश्याग्ने-
रीशमंगारं दक्षिणमवस्थाप्य तस्मिन्नुत्तमं कपालं निधाय तस्मिन्नन्यमंगारं निक्षिप्य पुनरपि
वेदेन कपालेंगारान्ध्यूह्य ततो मध्यदेशे पिष्टसेकार्थं अपः प्रताप्य प्रक्षालितां पात्रीं अग्नौ प्रताप्य
मुष्को कृत्वा स्वाग्रे निधाय सुसीतां मृंतस्यां पवित्रवत्यां चतुर्वारं पिष्टं संवपेत् । संवपन्वाचं यच्छ-
ति । प्रोक्षणीवत्सिद्धानुत्तरस्य स्रुवेण प्रणीतापात्रोदकमादाय वेदेनोपयम्य तदुदकं पिष्टे निनीय तत्राभिर-
क्षिरत्नु परिप्लुत्य मेक्षणेन संयुत्य पिंडीकृत्य अंगुष्ठमात्रं कूर्माकृतिं पुरोडाशं च्यावेदेन कपालादंगा ४

सप्तसंस्था

नेपोह्यस्थाल्यांतंदुलानोप्य कपालेपुरोडाशमधिश्रित्य दूर्वीसंदिताक्ताधानार्धंशरावमाज्यपात्रादुत्तरतः
स्थित्वा तस्मिन्नक्ताधानाः प्रक्षिप्य पुरोडाशं प्रथयित्वाद्भिः श्लक्ष्णीकृत्याज्यस्य। अधिश्रयणसंस्कार
पक्षेधिश्रयणादिसंस्कारं कृत्वाज्येन सह धानानां पर्यग्निकरणं। पक्षाज्यस्य केवलोत्पूतोतत्रास्थितैव
धानानां त्रिः प्रोक्षणमेव संस्कारं कुर्यात्। पक्षासर्वाणिहवींषि त्रिः पर्यग्निकृत्वानेनाज्यादीनां चतुर्णां
हविषां त्रिः पर्यग्निकरणं। अयमेव पक्षः प्रयोगरत्नादौ प्रचरत्नवस्थश्च। धानानां पात्रं पुरोडाशा
दुत्तरतः स्थापयित्वा पर्यग्निकरणमिसनंतस्वीये। ततः पुरोडाशमुल्मुकैः प्रताप्य दर्भैः प्रज्वाल्य वा
ग्निसंसर्गं कृत्वा वेदेन पुरोडाशोसीणारं भस्म प्रक्षिप्य सुशृतं प्रपश्येत्। हस्तं प्रक्षाल्य पात्रीं प्रक्षालयेत्।
ततः वेदेन पुरोडाशादंगारानपोह्य पुरोडाशमभिमंत्र्य चरुपुरोडाशावभिघार्योद्वास्य ततआशय
पात्रमुपस्तीर्य पर्यावर्त्तयन् पुरोडाशमुद्वास्य वेदेन भस्म प्रमृज्याशयपात्रे प्रतिष्ठापयति। ततः स्रु
वेण कपालमभ्यज्य पुनः स्रुवेणाज्यं गृहीत्वा पुरोडाशमनक्ति उपरिष्टादभ्यज्योधरत्वाद्धस्तेनोपान ६४
क्ति। ततोलौकिकाज्येन पुरोडाशं द्रवयित्वा प्रकटं दृष्ट्वं वा कुर्यात्। ततआस्तीर्णेबर्हिषि आज्यादुत्ति
त्तश्चरुमासाद्य तदुत्तरतः पुरोडाशं तदुत्तरत अक्ताधानात दुत्तरतो न क्ताः क्रमेणासाद्याग्न्य
र्चनादि आज्यभागांतं कृत्वा सर्वत्र ईदृशहोमविषये चरोर्युद्धरणं विभागाभिमर्शनं चैव स्थाली

तएवावदीयहोमंकुर्यात्। सहैवअपये तत्रनास्तिस्रुद्धरणं। तथा आदिष्टेमेधातिथिकारिकावचनात्। समंत्रक
होमेनविभागोना स्विष्टकृदिति प्रयोगपारिजातादौ लिखनात्। ततश्चतुरवत्ती स्रुच्युपस्तीर्यमध्यात्पूर्वार्धा
द्द्वयवदायपंचावत्ती तु पश्चार्धाद्द्वयवदायहविरवत्तं याभिघार्य। अग्नेनयेत्यादिमंत्रैश्चतुर्गतस्वाहाकारं पठन्स
मकालंजुहुयात्। अग्नेनयेतिचतसृणामगस्त्योऽग्निस्त्रिष्टुप्। अवदानकर्मप्रधानचरुहोमेविनियोगः॥
अग्नेनयसुपथारायेअस्मान्विश्वानिदेववयुनानिविद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठांतेनम
उक्तिंविधेमस्वाहा। अग्नयइदमितिसर्वत्रत्यागः। अग्नेत्वंपारयानव्योअस्मान्स्वस्तिभिरतिदुर्गाणि
विश्वा॥ पूश्चपृथ्वीबहुलानउर्वीभवातोकायतनयायशंयोःस्वाहा। अग्नेत्वमस्मद्युयोध्यमीवाअ
नग्नित्रा अभ्यमंतकृष्टीः। पुनरस्मभ्यंसुवितायदेववक्षांविश्वेभिरमृतेभिर्यजत्रस्वाहा०। पाहिनोअ
ग्नेपायुभिरजस्रैरुतप्रियेसदनआशुशुक्वान्। मातेभयंजरितारंयविष्ठनूनंविदन्मापरंसहस्वाहा०।
एवंचतुष्टयेनत्यागचतुष्टयंकृत्वासव्यपाणिनादक्षिणांसोद्यतेनैवस्रुवेणोपस्तीर्यस्रुग्स्थंपुरोडाशंनिधा
पूर्तंद्विरभिघार्यप्रतिष्ठितमपर्यावर्तयन् अच्युतायभौमायस्वाहेतिमंत्रेणहुत्वाअच्युतायभौमा ए २
येतित्यजेत्। तृतीयस्मिन्नाज्यपुरोडाशःस्थापितस्तदाशयाज्यंतत्स्रुवेणवत्स्थंष्टरीत्या

मा नो अग्न इत्यस्य गत्सोऽग्निस्त्रिष्टुप्। आराध्याज्यहोमे वि०। मा नो अग्नेवसृजो अघायाविष्यवे रिपवे दुच्छुनायै। मा
दत्वतेदस्मातेमारतेनोमारीषते सहसावन्परादाः स्वाहा। अग्नय इदं।०। ततः स्वांजलावन्येन केनचित्स्रोक्षपित्वाते
नेवस्त्रेण गृहीताज्येनोपस्तरणं कारयित्वामुष्टिनानक्ताधानाः द्विर्वपयित्वा पंचावत्ती चेत्त्रिः प्रत्यभिघाराभि
घारौ कारयित्वा शन्नोत्सवं त्विसुस्यवसिष्टो वाजिनस्त्रिष्टुप्। श्रवणाकर्मप्रधान। शयाज्यहोमे वि०। शन्नोभ
वंतु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः। जंभयंतोऽहिं वृकं रक्षांसि सनेम्यस्म युयवन्नमीवाः स्वाहा। वाजिभ्य
त ५ इदं।०। ततः अक्ताधानाः पुत्रादिस्याद्दद्यात्। ततश्चतुरवत्ती स्विष्टकृदर्थं हविषां उत्तरार्धात्सकृद्गृहीत्वा पंचावत्ती चे
द्विर्द्विर्गृहीत्वावत्तं द्विरभिघार्य स्विष्टकृतं हुत्वा प्रायश्चित्तादि होमशेषं समाप्य पूर्णपात्रनिनयनांते कपाल
मुद्वास्य संस्थाजपं कृत्वा ब्राह्मणभोजनादिशेषं कृत्वा पवित्रग्रंथिं विस्रस्य शुचिरह्नो क्षिपेत्। द्विराचामेच्चेति।
आपस्तंबश्रौतधर्मकप्रायः कारिकानुसारी श्रवणाकर्मप्रयोगः। अथ बोधायनधर्मकः। तत्र संकल्पप्रभृ
तिपर्युक्षणांतं पूर्ववत्कृत्वा पात्रासादने विशेषः। कपालेन सह चरुस्थालीप्रोक्षण्योरस्थिसु वा निस्यादिस्तु
सत्वांतं शम्यां दृषदं च उपलां मेक्षणं पिष्टोद्वहनीं च वेदमाशायपात्रं धृष्टिं चमसं तीक्ष्णं चेत्यासाद्य पवित्र
करणादि तंडुलान्नी पूर्ववद्द्विभागं कृत्वा भागचतुष्टयमेकीकृत्य चर्वर्थं पंचमभागं पेषयेत्। कृष्णाजिन
मवधूय पूर्ववदास्तीर्य तस्मिन्नुदग्ग्रीवं शम्यां निधाय तस्यां प्राचीं दृषदं तदुपर्युपलां पूर्ववत्पूर्वमनुस्त्जन

५

९ कृत्वातदुभयजलं ६

निधायपुरोडाशार्थंतंदुलभागंदृषदि निधायप्राचीमुपलांप्रोक्षप्रतीचींतिरश्चींचप्रोक्ष्यपाणिद्वयेनस
कृदन्वीक्षितकृष्णाजिनेपिष्ट्वा निष्प्रस्कंदयित्वापत्न्यापेषयेत्। ततोधृष्टिमादायतूष्णीमग्निमंत्र्यधृष्ट्यो
कमंगारंदक्षिणतोनिरस्यापउपस्पृश्यान्यमंगारंअग्न्यायतनस्यपश्चान्निधायतदुपरिपूर्वासादि
तंपाणिसंमितंकपालंस्रुवं निधायतदुपर्यन्यमंगारंनिधायतदुपरि अन्यान्यपिबहूनंगारान्प्रक्षि
प्यमदंतीसजलांनिधायपिष्टोद्धपनीचाधिश्रित्यसपवित्रायांतस्यांकृष्णाजिनास्थितानिनिक्षिप्य
शुष्कतंदुलपिष्टेषुपरिकर्मिणाप्रणीतोदकंस्रुवेणपात्रांतरेकृतेषुदत्तोपसंगृहीतंएवंमदंतीजलंपिष्टवानयित्वा
पिष्टोद्धपनीमुत्तार्यमदंतीजलंयावद्पेक्षितंतद्वामेदक्षिणेनमिश्रयित्वापिंडंकूर्माकारंकृत्वानरुस्थाल्यांतं
दुलान्प्रक्षिप्यजलसहितांस्थालींअग्नावधिश्रित्यधृष्ट्याकपालांगारान्सर्वानायतनेप्रक्षिप्यकपालेपु
प५ रोडाशमधिश्रयेत्। पुरोडाशंप्रथयित्वाज्यंनिरूप्याधिश्रित्यपिष्टोद्धपन्यांजलमासिच्यतेनजलेन
चिः पुरोडाशस्यत्वचंग्राहयित्वाधानाभिःसहसर्वाणित्रिःपर्यग्निकृत्वादर्भैःपुरोडाशंप्रपर्यग्नि
वीक्ष्यपुरोडाशंभस्मप्रक्षिप्यत्रिवारंवेदेनसांगारंभस्मप्रक्षिप्यसुश्रृतंश्रपयेत्॥ आज्योद्वासनादि
बर्हिषिस्रुक्स्रुवनिधानांतेआशयपात्रमुपस्तीर्यचरुमभिघार्योदगुद्वास्यधृष्ट्यापुरोडाशादंगारान
पोह्यवेदेनभस्मप्रमृज्यपुरोडाशमभिघार्योदगुद्वास्यवामहस्तेधृष्ट्यांनिधाय ~~तेनैवपिष्टोद्धपनीमपि~~ ६

पुनरभिघार्य स्रुचं लिप्ताज्येनांगुल्याधस्तादंकाशायपात्रे निधाय लौकिकाज्येन सूर्यैपिलाप्रकटष्टं वा कुर्या
त्। कपालमुद्रास्याभिघारयेत। तत आस्तीर्णबर्हिषि हवींष्यासाद्याग्न्यर्चनाद्याज्यभागांतं कृत्वा प्रधान
होमा स्विष्टाय। स्विष्टहोमशेषसमाप्त्यंतं कृत्वा प्रणीतानिनयनादिकर्मशेषं समाप्य पवित्रत्यागांतं तं वं कुर्या
त्। अत्र पुरोडाशहोमे हस्तमुपस्तीर्य पुरोडाशं स्रुचं गृहीत्वा श्रौतवत्। स्रुवेणाशयाद्द्वितीयमवदायह
विरवत्तं चाभिघार्य पुरोडाशहोमं केचित्कुर्वंति तथा स्विष्टकृति आशायादपि गृहीत्वा स्विष्टकृद्धोमं चेति॥
इति बोधायनश्रौततंत्रानुसारि श्रवणाकर्म॥ श्रीशंकरो जयति॥ अथ सर्पबलिकर्म॥ श्रवणाकर्मसौम्यानंत मा ६
रमेव तद्दिने प्रतिदिन्यो पासनस्य पश्चाद्दर्भेष्वासीनो दर्भान्धारयमाणः प्राणानायम्य देशकालौ संकीर्त्य
मम भार्यापुत्रभ्रातृदुहितृसमेतस्य भौमांतरिक्षदिव्यादिकृत्य सर्पेभ्यः संभावितबाधापरिहारद्वारा श्रीप
रमेश्वरप्रीत्यर्थं नित्यविधिरूपं सर्पबलिकर्म करिष्ये इति संकल्प्य पूर्वं कलशं दर्वीं च नवे शिक्ये स्थापित
तत्र कलशं गृहीत्वा सकुशिर्दर्भैर्हरयित्वा तत्सहितकलशं गृहीत्वा गृहान्निष्क्रम्य प्राच्यां दर्वीं गृहीतद
ग्रामाग्रस्य प्रा॰ स्रुवः स्रुचो देशो अप आसिच्य सर्पदेवजनेभ्यः स्वाहेति मंत्रेण दर्व्या सकृत्त्रीनि
क्षिप्य सर्पदेवजनेभ्यः स्वाहा। इदं न ममेति त्यजेत्॥ बलेर्बलेरुपनिधातरा केनापि न व्यवधानं कार्य
मापरिधीनात्। ततः सर्पानुद्दिश्य। ये सर्पाः पार्थिवाय आंतरिक्ष्याये दिव्याये दिश्यास्तेभ्य इमं बलिमाहार्षं

तेभ्य इमं बलिमुपाकरोमीति मंत्रेण दत्तिरस्मेतेन संहताभ्यां पाणिभ्यां कारिका कारोन्नमते नांजलिना वा नमस्कृत्य
बलिं प्रदक्षिणीकृत्य पश्चादग्नेरुपविश्य। सर्पोसि सर्प तां सर्पाणामधिपतिरस्यन्नेन मनुष्यांस्त्रायसेऽपूपेन
मा॰३ सर्पान्यज्ञेन देवांस्त्वयि मा संतं त्वयि संतः सर्पा मा हिंसिषुर्ध्रुवां ते परिददामीति। मंत्रसंत्रकमंत्रमुपांशु संज
पेत्॥ ततः ध्रुव अमुकं ते परिददामीति ज्येष्ठपुत्रक्रमेण पुत्रादीन् अप्रत्तदुहितॄः जायां आत्मानं चांते निवेदयेत्॥
ध्रुवसावित्री ते परिददामीति ध्रुवसत्यवती ते परिददामीति। स्त्रीरूपनिवेदने ध्रुवं मां ते परिददामीति कर्तुः॥
नीचे ६ अन्यः कर्म्मा पदस्थाने यजमाननाम द्वितीयांतमुक्त्वा परिददामीति वदेत्। ततः श्रावणप्रतिपत्प्रभृति यस्मि
न्नहनि प्रत्यवरोहणं क्रियते तस्मादर्वाचीनदिनानि हासयद्भिर्यां परिगणय्य ते षष्ठः सुयावंतः सायंप्रातःका
लास्तावतो बलीन् दद्यादेव सर्पदेवजनेभ्य इति मंत्रेण दद्यादिति मुख्यः पक्षः। निरसनेन पक्षस्तु यथांतरेणो ६ बलि
ज्ञेयः॥ इति सर्पबलिप्रयोगः॥ अथाश्वयुजीकर्म। एतच्च संपूर्णपर्वणि कर्तव्येऽसंदेह एव। खंडे तु विद्धे
तिथ्याश्व प्रतिपदोः संधिदिने कार्यं॥ एतच्च सद्यस्कालं द्व्यहकालं वा॥ ततः पूर्वेद्युः कुड्यानां लेपनं कृत्वा
सुधवसमीकृत्य वितानबंधनादिना निवेशनमलंकृत्य अपरेद्युः सर्वे गार्ह्याः कृताभ्यंगस्नानाः शुक्ला
म्बरधरा भवेयुः॥ प्रातरौपासने कृते प्रथमप्रयोगे नांदीश्राद्धांते कृत्वा तीर्थेन प्रविश्यौपासनस्य पश्चाद्
दर्भेष्वासीनो दर्भान्धारयमाणः प्राणानायम्य देश[illegible]कालौ संकीर्त्य मम स्त्रीपुत्रादिसहितस्यान्ना ७

सप्तसंस्था

८ x पशुपतये शिवाय शंकराय पृषातकाय स्वाहेति मंत्रेण हुत्वा ८

पेक्षितविषयसंपूर्णानवसादनास्य छिद्धरात्री परमेश्वरप्रीत्यर्थं नित्यविधिरूपमाश्वयुजीकर्म करिष्य इति
संकल्प्याग्निध्यानांते समिद्द्वयमादाय च जुहुयात् पशुपतिं चरुद्रव्येण पृषातकं पृषातकद्रव्येण शेषेण स्वि
ष्टकृतमित्यादि अत्र प्रधानसंकीर्तने पशुपतिं शिवं शंकरं पृषातकमित्यनंतं देवीये॥ ततः पात्रासादनाद्या
स्त्वं तदर्थेषु चरुस्थालीं पृषातकस्थालीं च दक्षिणेन हस्तेन वामेन प्रोक्षणीमित्यादि शूर्पे पवित्रनिधा
नांते पशुपतये त्वा जुष्टं निर्वपामीति मंत्रावृत्त्या चतुरो मुष्टीन्निरूप्य तत्संख्यया प्रोक्षणावघातादि चरुश्रपणां
ते पृषातकस्थाल्यां पयो निषिच्य तदुपर्याज्यं निषिच्य तत्पृषातकसंज्ञं हविः कुर्यात्॥ तत आज्याधिश्रयणादि
ते पृषातकेन सह पर्यग्निकरणं केवलोत्सृतौ तु पृषातकस्य केवलप्रोक्षणमेव कृत्वाज्योद्वासनादि आज्यभागांते सु
तादिभिरन्वारब्धः स्वयमेव दाय। ॐ पशुपतये शिवाय शंकराय पृषातकाय इदमिति सृजेत्॥ ततो यजमानांज
वहाया ५ लावन्यः कश्चिदुपस्तीर्य पृषातकं स्रुवेण द्विरभिघार्य॥ ऊनं मे पूर्यतां पूर्णं मे मोपसदत् पृषातकाय स्वाहेति हु
त्वा पृषातकायेदमिति सृजेत्॥ ततः स्विष्टकृदर्थं चरुमवदाय पृषातकं स्रुवेणोत्तरार्धाद्गृहीत्वा द्विरभिघार्य
स्वादि संस्थाजपांते दशावरान्वा ब्राह्मणान्भोजयेत्॥ इत्याश्वयुजीकर्म॥ अथाग्रयणम्॥ एतच्चाग्नि
न कार्तिकमासद्वयात्मकऋतावेकस्मिन् ह्यि सर्वेणितदन्वाने शुक्लपक्षस्य देवनक्षत्रे तद्युक्ते रवत्यी वा
व्रीह्याग्रयणं॥ एवमुक्तकाले वर्षासु श्रावणभाद्रपदयोः श्यामाकानां वसंते चैत्रवैशाखयोर्यवानामिति॥

८ एवं पर्वेतिकरणे संपूर्णे पर्वण्यसंदेह एव । पर्वखंडे तु विशेषः । न आवर्त्तनेततः पूर्वं वा मात्रप्रतिपदोः संधौ
संधिदिन एवादौ प्रकृतिं समाप्य पश्चादाग्रयणं आवर्त्तनादूर्ध्वं संधौ तु संधिदिनात्पूर्वदिने विकृते
रन्वाधानं विधाय संधिदिने विकृतिं कुर्यात् दिन एव वा सद्यस्कालं तदुत्तरं प्रकृतेरन्वाधायादितीयदिने
केवलप्रकृतिः । सद्यस्कालं वा । पौर्णमास्यामप्यावर्त्तनेततः पूर्वं वा पर्वप्रतिपदोः संधौ संधिदिने आ
दावाग्रयणं कुर्यात् तदुत्तरमेव प्रकृतिः । आवर्त्तनादूर्ध्वं तु पूर्वोक्तमेव तत् ॥ केचित्तु आग्रयणस्य विकृति
त्वादाग्रयणेऽपि पर्वसंधिः स्यात् तस्मिन् प्रकृतिं विकृत्यारभ्यनेन विकृतिसामान्यविहितेन आग्रयण
स्यापि पौर्णमास्याममावास्यायां वा विशेषेण संधिदिन एव प्रकृत्युत्तरमेव कर्तव्यमिति वदंति ॥ अ
थ प्रयोगः ॥ उक्तदिने प्रातर्होमे कृते प्रथमं स्वस्तिवाचननांदीश्राद्धांते कृत्वा शुचिः कर्मांगं द्विराच
म्य तीर्थे प्रविश्यौपासनस्य पश्चाद्दर्भेष्वासीनो दर्भान् धारयमाणः प्राणानायम्य देशकालावनु
कीर्त्य मम जरारोगनिवृत्ति श्रीयशोऽन्नप्राप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं निरूढविधिरूपमाग्रयणं करि
ष्य इति संकल्प्याग्निं ध्यात्वा तत्समिद्वयमादाय चतुर्थ्यंतैरिंद्राग्नी विश्वान्देवान् व्रीहिचरुणा ।
अथ वृत्तिकारैः श्यामाकाग्रयणस्य पृथक् विहितत्वात्तत्करणपक्षे सोमं श्यामाकचरुणा द्यावा
पृथिव्यौ व्रीहिचरुणा च यक्ष्ये शेषेण स्विष्टकृदादि समिद्वयमाधाय संमार्जनादि दर्भास्तृतेषु चरुस्थालीद्वयं ८

चरि १

४ विश्वेदेवार्थं निरूप्तां तस्य यातथैव प्रोक्ष्य प्रक्षालितपवित्रे श्यामाकतंडुले निधाय निर्वपवत्सोक्ष्य
प्रोक्षण्या विश्वादि शूर्पद्वयं कृत्वा जिनमिस्यादि शूर्पे पवित्रनिधानांतं कृत्वा प्रथमशूर्पे ऐंद्राग्नवैश्वदेवार्थं चतु
रश्चतुरो मुष्टी न्निरूप्य पवित्रे संमृज्यापरे शूर्पे निधाय सोमाय त्वा जुष्टं निर्वपामीति मंत्रावृत्त्या श्यामाका
नां चतुरो मुष्टी न्निरूप्य पुनः पवित्रे संमृज्य प्रथमपूर्णे स्थाप्य द्यावापृथिव्यर्थं तंडुलानां चतुरो मुष्टी न्निरू
प्यैंद्राग्नवैश्वदेवद्यावापृथिवीयतंडुलानामवघातादिफलीकरणांतं कृत्वा संमृष्टोलूखले संमृष्टमुसले
विधाय ५ नैव श्यामाकानां फलीकरणांतं कृत्वा यथायोग्यं प्रक्षालनादि चरुश्रपणांतं कृत्वाज्यसंस्कारादि चरू
द्वयस्य बर्हिष्यासादनांतं कृत्वा तूतोग्न्यर्चनादि आज्यभागांते कृते चतुरवत्ती पंचावत्ती वा यथाधिका
रं चरुस्थाली स्थदवावदानधर्मेणावदाय ॐ सजूरृतुभिः सजूर्विधाभिः सजूरिंद्राग्निभ्यां स्वाहा॥ इंद्रा ग्नि ७
ग्निभ्यामिदं न मम। पुनस्तस्मादेव चरोः पूर्ववद्गृहीत्वा सजूरृतुभिः सजूर्विधाभिः सजूर्विश्वेभ्यो देवेभ्यः
स्वाहा। विश्वेभ्यो देवेभ्य इदं० आकृतिद्वयं कृत्वा श्यामाकचरोः पूर्ववदवदाय। सोमाय स्वाहा। सोमायेदं० पुनः
पूर्वचरोः पूर्ववदवदाय सजूरृतुभिः सजूर्विधा० द्यावापृथिवीभ्यां स्वाहा। द्यावापृथिवीभ्यामिदं० ततः व्री
हिचरोः श्यामाकचरोश्चोत्तरार्धात् क्रमेण सकृत्सकृदवदायाद्भिरभिघार्य पंचावत्ती चेद्द्विर्द्विरवदाय पूर्ववद्भिरभि
घार्य स्विष्टकृतं कृत्वाकृतावृ। शिष्टचरोरेकदेशं पात्रांतरे आदाय विहाराद्बहिः सव्यपाणौ कृत्वा ॐ प्रजा
पतये त्वा ... ग्टहं ग्टण्हामि मत्वं श्रियै मर्त्यपरासिमघ मन्त्राघायेति दक्षिणपाणिना तदन्नमभिमृश्य

सप्तसंस्था

१

भद्रान्नः श्रेयः समनैष्ट देवास्त्वयावसेन समशीमहि त्वा। स नो मयोभूः पितवाविवेश शं नो भव द्विपदे शं चतुष्पदे। इ
तिमंत्रेण तत्स्थालीपाकं प्राश्य हस्तं प्रक्षाल्याद्भिराचम्य त्रेवासीनः। अमोसि प्राण तदृतं ब्रवीम्यमासि सर्वानसि प्रवि
ष्टः। स मे जरां रोगमपनुद्य शरीरादमामएधिमाम्नधाम इंद्र। इति मंत्रेण नाभिमालभेत। ततः पत्नी चरोर्मध्यमपु
रोडाशं गृहीत्वा तूष्णीं भक्षयेत्तदाचामेच्च। अथ यजमानः इध्मसन्नहनहोमादि परिषेचनांतं कर्मशेषं समाप्य विंशति
२९ षट् द्वौ ब्राह्मणान् भोजयेत्। ततः पवित्रग्रंथिं विस्रस्य प्रचिदेशोक्षिपेत्तदाचामेच्च। इत्याग्रयणं॥ इदमाग्रयणमाश्वि
नशुक्लपौर्णमास्यां आवर्तनापूर्वेसंधिमत्यां यदि क्रियते तदा एतस्य पौर्णमासप्रकृतेः प्राकृकरणत्वात् आश्व
मा युजीकर्मणा समानतंत्रत्वेपि कार्ये। ततः प्रभृति न। अपि पौर्णमास्यां अमावास्यायां वाग्रयणेष्टिं अन्वायातया ग=
दिस्यापस्तंबसूत्रोदितया त्रिकाण्डमण्डनव्याख्यानेच्चा उक्तकल्पत्वेन प्रवृत्त्या समानतंत्रेणार्यैः। तेनाश्वयुजी आ
ग्रयणप्रकृतिस्थालीपाकाः समानतंत्राः। अतएव इह शेषवेणी दर्शेज्याः परमुक्ताग्रयणमित्येतद्वचनगत
इष्टिपदादेव एतद्वचनस्य स्मार्तेन विषय इति व्याख्याय पाकयज्ञान् समासाद्यैकतन्त्र्यानेकबर्हिष एकः स्वि
ष्टकृत् इति सूत्रात्। आश्वयुजीकर्माग्रयणकर्मप्रकृतिस्थालीपाकाः समानतंत्राः कार्या इत्युक्तं। मयूखे
पि एवं चैतेषां समानतंत्रत्वेऽथं प्रयोगः। देशकालादि स्मरणांते पूर्वसंकल्पवाम मम स्त्री पुत्रादि समेतस्य सा
दिनित्यविधिरूपमाश्वयुजीकर्म तथा मम रोगजरानिवृत्त्यादि आग्रयणं पौर्णमासस्थालीपाकेन समा

नतंत्रं करिष्य इति संकल्प्य। अग्निध्यानांते अग्निमग्नीषोमौ चरुणा पशुपतिं चरुणा पशुपतिं शिवं शंकरं
पृषातकं पृषातकं इत्येण इंद्राग्नी विश्वान्देवान्व्रीहि चरुणा श्यामाकपक्षे सोमं श्यामाकचरुणा द्यावापृथिव्यौ व्री
हि चरुणा चयक्ष्य॥ शेषेण स्वन्वाधानांते पर्युक्षणांतं कृत्वा पात्रासादनकाले प्राकृतहविःश्रपणार्थं कांस्थालीं
पशुपत्यर्थं द्वितीयां पृषातकार्थं तृतीयां आग्रयणाह विस्त्रपार्थं चतुर्थीं सौम्यचरुपक्षे श्यामाकार्थं पंचमीमिति
स्थालीः दक्षिणेन संगृह्य वामेन प्रोक्षणीमित्यादि व्रीहिपात्रासादनांतं कृत्वा हविर्ग्रहणार्थं समंत्रकं निर्वापं उलूखल्य
याजीर्णानां स्थाली पशुपत्यर्थं यतस्मिन्नेव स्पेमे च व्रज्जीणिस्येव निर्वापं विधाय ततः पवित्रे संमृज्य तत्पवित्रे
मध्यमस्थाल्यां ऐंद्राग्नविश्वेदेवार्थं च नवानां व्रीही चतुरश्चतुरो मुष्टीन्निरूप्य संमृज्य पवित्रे प्रथमस्थालीनि
वीपवत्प्रोक्षणं कृत्वा एवं संमृष्टपवित्रे सर्वत्र निरूप्य तत्क्रमेण स्थाप्य निर्वापवत्क्रमेण सर्वत्र प्रोक्षणं विधाय
प्राकृतानां पशुपत्यर्थानां चावघातफलीकरणे युगपत्कृत्वा ततः संमृष्ट उलूखले संमृष्टमुसलेनैवेंद्राग्नविश्वे
देवद्यावापृथिवीयार्थानामवघातादि फलीकरणांतं विधाय पुनः संमृष्टे एव उलूखले संमृष्टमुसलेन श्या
माकानां फलीकरणांतं विधाय प्रथमं शूर्पस्थान्प्रक्षालनं कृत्वा तन्मध्ये प्राकृतहविर्द्रव्यस्य तंडुलान्प्रक्षाल्य
चरुस्थाल्यामोप्य पशुपतिभागं तत्पृथक्कृत द्वितीयस्थाल्यामोप्य नवीनव्रीहितंडुलान् श्यामाकतंडुलांश्च
प्रक्षाल्य क्रमेण तत्तत्स्थाल्यामोप्य प्राकृतादिस्थाली चतुष्टयमग्नौ क्रमेण निधायाज्यसंस्कारांतं कृत्वा

पूर्ववत्पृषातकस्योत्पत्तिसंस्कारं च कृत्वाज्योद्वासनादि समानं तिच्चरुचतुष्टयस्य क्रमेणाभिघारणं कृत्वाभिघारणक्रमेणोद्
गुद्वास्याज्यादूक्षितः पौर्णमासं हविरासाद्य तदुत्तरे व्युद्धारणांतदुत्तरत उद्धृतं स्थक्रमेण हविश्चतुष्टयमासाद्याग्न्यचि
नाद्याज्यभागांते प्राक्स्थालीहविस्थाली तथा चरुं व्युद्धरणपात्रे व्युद्धृत्य विभज्य इदमग्नये इदमग्नीषोमाभ्यामित्युद्धृ
संस्कृतमभिमृश्य चतुरवत्ती पंचावत्ती वा यथाधिकारं दक्षिणभागस्थं चरुमवदानधर्मेणावदायाग्नये स्वाहेति हुत्वा
तथैव त्यक्त्वा एवमग्नीषोमीयं यागं कृत्वा तथैव त्यजेत्। ततः स्थालीस्थमेवावदानधर्मेणावदाय पशुपतये शर्वा
य शंकराय पृषातकाय स्वाहेति हुत्वा तथैव त्यजेत्। ततो यजमानः स्वांजलिनैव पृषातकं पूर्ववद्धुत्वा स्थालीस्थ
एव चरुमवदानधर्मेणावदाय पूर्वोक्तमंत्राभ्यां इंद्राग्निभ्यां विश्वेभ्यो देवेभ्य च हुत्वा यागं कृत्वा स्थालीस्थमेवोक्त
विधिना श्यामाकचरुमवदाय सोमाय स्वाहेति मंत्रेण हुत्वा सोमायेदं०। पुनस्तृतीयस्थालीस्थचरोरवदाय
द्यावापृथिवीभ्यामुक्तक्रमेण हुत्वा स्विष्टकृदर्थं तु हविः सर्वेषामुत्तरार्धात्सकृत्सकृदवदाय स्विष्टकृतं हुत्वा कृताव
९६ शिष्टे कर्मस्वांपाग्रांतरे गृहीघातदभिमर्शनतर्पणादि ब्राह्मणभोजन [illegible] संकल्पांतं सर्वं कुर्यादिति। एत्साम्रयुज्या
ग्रयणयोः प्रयस्यासहप्रयोगः॥ अथाग्रयणासंभवे अनुकल्पानपि तत्तदाग्रयणकाले एवं कुर्यात्॥ ते च सां
खायनब्राह्मणे उक्ताः॥ यदा ग्लानिशंका तदा पौर्णमासममावास्यं वा हविर्निर्वापानां व्रीहीणां यवानां च कुर्यादिति॥
दर्शपूर्णमाससमानतंत्रत्वमित्यपि आपस्तंबीये अनुकल्पांतराण्यपि प्रायश्चित्तं चंद्रिकायां। नवान्नेन ब्राह्मणान्भो १०
जयेत्। सूतकादिनिनानारब्धदर्शपूर्णमासस्याग्रयणकाल प्राप्तो कात्यायनः॥ दर्शपूर्णमासावनीजानोदग्नि
णाग्निपक्वे चरुः शरावं ब्राह्मणान्भोजयेत् किंचिद्दद्यादिति॥ एतच्चैत्यं दर्शपूर्णमासाभावे ज्ञेयं। इत्यनुकल्पाः॥

प तस्याभावे गौणकाले कर्त्तव्या कर्त्तव्यं। वरदराजीये। यद्याग्रयणस्य औपासनाग्निसिध्यनंतरं शरत्कालप्राप्तौ तत्रा
नारंभे आगामी शरत्काला स्पूर्वं पाथिकृतौ वैश्वानरी कर्त्तव्ये। अथवा वित्रेष्टिः। इदमिष्टिद्वयं वरदराजीयमते॥
स्वसूत्रमते तु पाथिकृत्येव। मतांतरे तु आरब्धाग्रयणस्यातिपत्तौ प्रायश्चित्तं देवात्मानुषाद्वा पराधात्प्रारंभे त्व
कृते द्वितीयशरत्कालप्राप्ते आरंभ एव कर्त्तव्यः। न तु प्रायश्चित्तमिति। यदि प्रथमाग्रयणानुष्ठाने प्रवृत्ते संकटव
शान मध्ये विच्छिद्येत तदापि संकटनिवृत्तौ वित्रेष्टिः। अथ प्रवृत्ताग्रयणस्य शरदत्यये च आगामिन्याः शर
दः पूर्वं पाथिकृतीं वैश्वानरीं च कार्ये इति प्रायश्चित्तप्रदीपे॥ श्यामाकानामा व्रीहिभ्यो गौणकालः। व्रीहिणामा
यवेभ्यो यवानामा श्यामाकेभ्यः॥ अनापदि गौणकाले प्रायश्चित्तपूर्वकमाग्रयणं॥ आपदि गौणकाले कुर्वन्
प्रायश्चित्तं विनैवाग्रयणमिति व्यवस्था का। गौणकालेप्यतिक्रांते वैश्वानरेष्टिं कृत्वाग्रयणमिति। गौणका
लेन कृतं चेदागामि शरत्कालप्रवृत्तिदिने एवोत्तरेज्याधिकारार्थं पाथिकृद्वैश्वानर्यौ कार्ये एव॥ नातिपन्ना
ग्रयणमिति वरदराजीये॥ अत्र सर्वत्रोक्तेष्टीनां स्थाने तत्तद्देवताकाः स्थालीपाकाः कार्याः॥ अथ तेषां
क्रमेण देवताः पथिकृति अग्निः पथिकृत्। वैश्वानरे अग्निर्वैश्वानरः। वित्रेष्टि अग्निरिंद्रः सोमश्चेति त्र
यः। अथैषामनुष्ठानप्रयोगः। मुख्यकाले अकृताग्रयणजन्यदोषनिबर्हणार्थं पथिकृत्स्थालीपाकं वै
श्वानरस्थालीपाकं चेति संकल्पः। पथिकृद्वैश्वानरयोः संख्ये स्थालीद्वयं वित्रेष्टेस्तु सह श्रपणं भिन्नं
वेति पक्षद्वयं॥ अन्वाधाने अग्निं पथिकृतं चरुद्रव्येण। अग्निं वैश्वानरं॥ वित्रेष्टे अग्निमिंद्रं सोमं। अग्न
२ × च तंत्रेण करिष्ये। वित्रेष्टि स्थालीपात्रं वा स्वसूत्रमते केवलपथिस्थालीपाकं २

११ येपधिस्रतेजुष्टंनिर्वोमि। अग्नये वैश्वानराय जुष्टंनि० अग्नये जुष्टंनि० इंद्राय जु० सोमाय जु० एवंप्रोक्षामी
ति विशेषः। सहस्रप्रस्रापक्षेदित्रेयं। आज्यभागोत्तरं चुरुणपात्रेचरं युद्धृत्य विभज्य यथादेवतं तमभि
म्रस्याव दानधर्मेणहोमः। शेषंप्रकृतिवत्। प्रथमाग्रयणप्रयोगमध्ये विघ्ने जन्यदोषनिर्बर्हणार्थं विघ्नेष्टे
ष्टिस्थालीपाकं करिष्यइति। स्थालीपाकस्थाने पूर्णाहुतिंहोष्यामीतिवासंकल्पः। अयंस्थालीपाकः
पूर्णाहुतिर्वा। प्राक्तलतंत्रमध्यएव॥ गौणकालेप्यकृताग्रयणजन्यदोषपरिहारपूर्वकं उत्तरेज्या। धिकारा
र्थं पार्थिवस्थालीपाकं वैश्वानरस्थालीपाकं चरतंत्रेणकरिष्यइतिसंकल्पः। स्वस्तंत्रमेतप्यिकृत्वैव॥
एतेषांप्रायश्चित्तस्थालीपाकानांस्थानेपूर्णाहुतिर्नीसाह्याद्दशगृहीतेनाष्टगृहीतेनचतुर्गृहीतेनस्रु
वपूर्णेनैकेनेति। इत्याग्रयणस्यगौणकालेकर्तव्यविचारस्तस्यप्रायश्चित्तंविचारश्च॥ अथप्रत्यव
रोहणं॥ एतच्चमार्गशीर्षशुक्लचतुर्दश्यां अस्तमयये। गिन्यांतघुत्तायामेवपौर्णमास्यांवाकर्तव्यं॥
चतुर्दश्याःपौर्णमास्याश्चरवंडचेविकृतिस्यादुत्तरस्यांचतुर्दश्यांसंधिमत्यांचदश्यांवा। अन्यतरस्यां
वाकर्तव्यंस सायंकालं प्रातःकालंवा॥ अथुक्ता दिवे वापामार्गा घुन्मुलनं भूमिसमीकरणं पूर्वबल्वावाकुप
लेपन वितानबंधादिनागृहमलंकृत्य फलरहितधान्यतृणारब्धपलाल निर्मितकटं चसंपाद्यप्रय ११

मत्प्रयोगे स्वस्तिवाचनादि नांदीश्राद्धांते पूर्वाह्ने एवं कृत्वा सायमौपासनहोमे कृते शुचिः कर्माणि द्विराचम्य ती
र्थे नत्र विस्यैोपासनस्य पश्चाद्दर्भेष्वासीनो दर्भान् धारयमाणः प्राणानायम्य देशकालावनुकीर्त्य
ममस्त्रीपुत्रादिसहितस्य जलस्थलसर्पबाधानिवृत्त्यर्थं हेमंतसौमस्य द्वारा श्रीपरमेश्वरप्रीत्यर्थं
नित्यविधिरूपं प्रत्यवरोहणं करिष्य इति संकल्प्याग्निध्यानांते समिद्द्वयमादाय चक्षुष्यंते छिः श्वेतं
पायसेन दध्ना संनहनेन रूद्रमित्यादि शूर्पे पवित्रनिधानांते तद्वीमेषां मुष्टीन्निरूप्य तथैव तत्सं
स्थाप्य। कृष्णावघातादि पयसि चरुं श्रपयित्वोदगुद्वास्य खादि आज्यभागांते सुतादिपिरश्वार
बधो वदान धर्मेणावदाय। अपश्वेतपदा जहि पूर्वेण चापरेण च। सप्त च वारुणीरिमाः सर्वाश्च राज
बांधवीः स्वाहा। श्वेतायेदं०। नवै श्वेतस्याभ्यागारे हिर्ददर्श किंचन। श्वेताय वैदार्वायनमः स्वाहेति
मंत्रेणाहुत्वा पूर्ववत्स्यजेत्। ततः अभयं नः प्राजापत्येभ्यो भूयादित्यग्निमीक्षमाणो जपित्वा। शिवोनः
सुमना भवेति मंत्रमुक्त्वा हेमंतऋतिराद्धं मनसा ध्यायेत्। ततः पूर्वनिर्मितं कटं अग्नेः पश्चात्स्वयमास्ती
र्य तत्कटे स्त्रीपुत्रादिसहितो यजमान उपविश्य तत्र ये मंत्रविदस्ते सर्वे स्योनेत्यारभ्य सर्वे मंत्रान्जपे
युः॥ नात्र कश्चनपुपवेशानंतरिका रिकामते। मंत्रविदः सर्वे स्योना जपं कृत्वा जपानंतरं सामात्यः कलत्रा

५४ स्थूर्चं त्रिर्जपित्वा पुनस्तत्रैव स्वस्त्यैवं छायित्वो स्थायोपविश्य दक्षिणमुखाः अतोदेवा अ
वंतु नो ५

द स हितः शयीतेति भाष्य ... लिखनात्। ततः स्योनापृथिवीति मेधातिथिर्ऋषिर्गायत्री भूमिप्रार्थने वि०
स्योना पृथिवि भवान्तृक्षरा निवेशनी। यच्छा नः शर्म सप्रथः। इति ऋचं सकृज्जपित्वा यजमानः प्राक्शि
रा उदङ्मुखो वा दक्षिणपार्श्वेन कटे शयीत॥ ततो ज्येष्ठक्रमेण पुत्रपौत्रादयः सर्वे यजमानादुत्तरतः
क्रमेण शयीरन्॥ यथावकाशं वा॥ ततउपविश्य प्राङ्मुखः। अतो देवा इति मेधातिथिर्विष्णुर्गायत्री। जपे
वि०। अतो देवा अवंतु नो यतो विष्णुर्विचक्रमे॥ पृथिव्याः सप्तधामभि॰ इति सकृज्जपित्वा पुनस्तथै
व शयित्वोत्थायोपविश्य प्रत्यङ्मुखाः। यतो विष्णुर्विचक्रमे इति द्वितीयपदं सकृज्जपित्वा पुनस्तथैव
उदुत्यंजातवेद शयित्वोत्थायोपविश्योदङ्मुखाः। पृथिव्याः सप्तधामभिः इति तृतीयपदं सकृज्जपेयुः॥ ततः स्वि
संवत्कृ १ ष्टकृदादिध्मसन्नहनप्रभृति होमशेषं समाप्य धृतपवित्रग्रंथिं विस्रस्य सर्वे। ततो यथाशय्यं श रा
३ यीरन्॥ ततउदिते सूर्ये कृतनित्यक्रियाः मंत्रविदः सर्वे पिसौर्याणि स्वस्त्ययनानि च जपेयुः। तानि च
४ उदुत्यमिति नवानां काण्वः प्रस्कण्वः सूर्यो गायत्री। जपे विनियोगः॥ उदुत्यं जातवेदसं देवं वहंति केतवः॥
दृशे विश्वाय सूर्यं। अपत्ये तायवो यथा नक्षत्रा यंत्यक्तुभिः। सूराय विश्वचक्षसे। अदृश्रमस्य केतवो
विरश्मयो जनाँ अनु। भ्राजंतो अग्नयो यथा॥ तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमाभासि रो

चनं॥ प्रत्यङ्देवानां। विशः प्रत्यङ्ङुदेषि मानुषान्॥ प्रत्यङ्विश्वंस्वर्दृशे॥१॥ येनापावकचक्षसा भुरण्यंतंजनां
अनु॥ त्वंवरुणपश्यसि॥ विद्यामेषिरजस्पृथ्वहामिमानोअक्तुभिः॥ पश्यञ्जन्मानि। सूर्य॥ सप्तत्वाह
रितोरथेवहंतिदेवसूर्य॥ शोचिष्केशंविचक्षण॥ अयुक्तसप्तशुंध्युवः सूरोरथस्यनप्त्यः॥ ताभिर्या
तिस्वयुक्तिभिः॥ उद्वयंतमसस्परिज्योतिष्पश्यंतउत्तरं॥ देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमं॥
उद्यन्नद्यमित्रमहआरोहन्नुत्तरांदिवं॥ हृद्रोगंममसूर्यहरिमाणंचनाशय॥ शुकेषुमेहरिमाणंरोपणा

चित्रंदेवानामुद
गादनीकं॥
कृ॥९ ७

कासुदध्मसि॥ अथोहारिद्रवेषुमेहरिमाणंनिदध्मसि॥ उदगादयमादित्योविश्वेनसहसासह॥ द्वि
षंतंमह्यंरंधयन्मोअहंद्विषतेरधं॥ चित्रंदेवानामितिषण्णां॥ मां गिरःकुत्सःसूर्यस्त्रिष्टुप्॥ जपे०॥
चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः॥ आप्राद्यावापृथिवीअंतरिक्षंसूर्यआत्माज
गतस्तस्थुषश्च॥ सूर्योदेवीमुषसंरोचमानांमर्योनयोषामभ्येतिपश्चात्॥ यत्रानरोदेवयंतोयुगानि
वितन्वतेप्रतिभद्रायभद्रं॥ भद्राअश्वाहरितःसूर्यस्यचित्राएतग्वाअनुमाद्यासह॥ नमस्यंतोदि
वआपृष्ठमस्थुःपरिद्यावापृथिवीयंतिसद्यः॥ तत्सूर्यस्यदेवत्वंतन्महित्वंमध्याकर्त्तोर्विततंसं
जभार॥ यदेदयुक्तहरितःसधस्थादाद्रात्रीवासस्तनुतेसिमस्मै॥ तन्मित्रस्यवरुणस्या
भिचक्षेसूर्योरूपंकृणुतेद्योरुपस्थे॥ अनंतमन्यद्रुशदस्यपाजःकृष्णमन्यद्धरितःसंभरंति॥

अघाद्देवाउदितासूर्यस्य।निरंहसःपिपृता।निरवद्यात्॥ तन्नोमित्रोवरुणोमामहंतामदितिःसिंधुःपृथिवीउत
द्यौः।२०॥६ नमोमित्रस्येति द्वादशानां अभितपाःसूर्योजगती॥ दशमीत्रिष्टुप्॥ जपेवि०।नमोमित्रस्यवरु
णस्यचक्षसेमहोदेवायतदृतंसपर्यत॥ दूरेदृशेदेवजातायकेतवेदिवस्पुत्रायसूर्यायशंसत॥ सामासत्यो
क्तिःपरिपातुविश्वतोद्यावाचयत्रततनन्नहानिच॥ विश्वमन्यन्निविशतेयदेजतिविश्वाहापोविश्वाहोदेति
सूर्यः॥ नतेअदेवःप्रदिवोनिवासतेयदेतशेभिःपतरैरथर्यसि॥ प्राचीनमन्यदनुवर्ततेरजउदन्येनज्यो
तिषायासिसूर्य॥ येनसूर्यज्योतिषाबाधसेतमोजगच्चविश्वमुदियर्षिभानुना॥ तेनास्मद्विश्वामनि
रामनाहुतिमपामीवामपदुष्वप्न्यंसुव॥ विश्वस्यहिप्रेषितोरक्षसिव्रतमहेळयन्नुच्चरसिस्वधाअनु॥ यद
द्यत्वासूर्योपब्रवामहैतंनोदेवाअनुमंसीरतक्रतुं॥ तन्नोद्यावापृथिवीतन्नआपइंद्रःशृण्वंतुमरुतोह
वंवचः॥ माशूनेभूमसूर्यस्यसंदृशिभद्रंजीवंतोजरणामशीमहि॥१॥ विश्वाहात्वासुमनसःसुचक्ष
सःप्रजावंतोअनमीवाअनागसः।उद्यंतंत्वामित्रमहोदिवेदिवेज्योग्जीवाःप्रतिपश्येमसूर्य॥ महि
ज्योतिर्बिभ्रतंत्वाविचक्षणभास्वंतंचक्षुषेचक्षुषेमयः॥ आरोहंतंबृहतःपाजसस्परिवयंजीवाःप्रति
पश्येमसूर्य॥ यस्यतेविश्वाभुवनानिकेतुनाप्रचेरतेनिचविशंतेअक्तुभिः॥ अनागास्त्वेनहरिकेशसू

र्यो न्हा न्होनो वस्यसावस्यसोदिहि॥ शन्नोभवचक्षसाशन्नोअन्हाशंभानुनाशंहिमाशंघृणेन॥ यथा
शमध्वंछमसङ्कुशेपातस्सयिद्ववितंधेहिचित्रं॥ अस्माकंदेवाउभयायजन्मनेशर्मयछतद्विपदेच
तुष्पदे॥ अदस्विबदूर्जीयमानमाशितंतस्मेशंयोरस्पोदधातन॥ यद्वोदेवाश्चकृमजिह्वयागुरुमन
सोवाप्रयुतीदेवहेळनं॥ अरावायोनोअभिदुछुनायतेतस्मिन्तदेनोवसवोनिधेतन॥१२॥ सूर्योनो
दिवस्पादितिपंचानांसूर्यपुत्रस्थूछुः सूर्योगायत्री॥ जपे०॥ सूर्योनोदिवस्पातुवातोअंतरिक्षात्॥ अग्निर्नः
पार्थिवेभ्यः॥ जोषासवितर्यस्यतेहरः शतंसवाँअर्हति॥ पाहिनोदिद्युतःपतंत्याः॥ चक्षुर्नोदेवःसविता
चक्षुर्नउतपर्वतः॥ चक्षुर्धाताद्धातुनः॥ चक्षुर्नोधेहिचक्षुषेचक्षुर्विख्येतनूभ्यः॥ संचेदंविपश्येम॥
सुसंदृशंत्वावयंप्रतिपश्येमसूर्य॥ विपश्येमन्नृचक्षसः॥५॥ आनोभद्राइतिदशर्चस्यराहूगणोगोत
मोविश्वेदेवाः पंचाद्याद्यैर्वतांजगत्यः सप्तमीजगतीषष्ठीविराट्शेषास्त्रिष्टुभः॥ जपे०॥ आनोभद्राः
क्रतवोयंतुविश्वतोदब्धासोअपरीतासउद्भिदः॥ देवानोयथासदमिद्वृधेअसन्नप्रायुवोरक्षितारोदिवे ८
दिवे॥ देवानांभद्रासुमतिर्ऋजूयतांदेवानांरातिरभिनोनिवर्ततां॥ देवानांसख्यमुपसेदिमावयं
देवानआयुःप्रतिरंतुजीवसे॥ तान्पूर्वयानिविदाहूमहेवयंभगंमित्रमदितिंदक्षमस्त्रिधं॥ अर्य
मणंवरुणंसोममश्विनासरस्वतीनःसुभगामयस्करत्॥ तन्नोवातोमयोभुवातुभेषजंत

सप्तसंस्थ

१४ न्माता पृथिवी तत्पिता द्यौः। तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवं। तमीशानं जगतस्तस्थु
षस्पतिं धियंजिन्वमवसे हूमहे वयं। पूषा णो यथासद्मिद्वृधे रक्षिता पायुरदब्धः स्वस्तये।१। स्वस्ति न इंद्रो वृद्धश्र
वाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु। पृषदश्वा मरुतः पृश्निमा
तरः शुभंयावानो विदथेषु जग्मयः। अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसागमन्निह। भद्रं कर्णेभिः
शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः। शतमिन्नु शरदो अंति दे
वा यत्रा णश्चक्रा जरसं तनूनां। पुत्रासो यत्र पितरो भवंति मा नो मध्या रीरिषतायुर्गंतोः। अदितिर्द्यौरदितिरंतरि
क्षमदितिर्माता स पिता स पुत्रः। विश्वे देवा अदितिः पंचजना अदितिर्जातमदितिर्जनित्वं।१०। स्वस्ति नो मिमीतामि
त्यस्य पंच, वस्यात्रि विश्वे देवाः आद्यास्त्रिष्टुभः अंत्ये द्वे अनुष्टुभौ। ज पे०। स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्य
दितिरनर्वणः। स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना। स्वस्तये वायुमुप ब्रवामहै सोमं स्वस्ति भु
वनस्य यस्पतिः। बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवंतु नः। विश्वे देवा नो अद्या स्वस्तये वैश्वानरो
वसुरग्निः स्वस्तये। देवा अवंत्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः। स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेव
ति। स्वस्ति न इंद्रश्चाग्निश्च स्वस्ति नो अदिते कृधि। स्वस्ति पंथामनु चरेम सूर्याचंद्रमसाविव। पुनर्ददताघ्नता जान
ता संगमेमहि।५। परावत इत्यस्य सप्तदशर्चस्य मानवो नाभानेदिष्ठो विश्वे देवा जगती। अंत्ये त्रिष्टुभौ जपे०।
परावतो ये दिधिषंत आप्यं मनुप्रीतासो जनिमा विवस्वतः। ययातेर्ये नहुष्यस्य बर्हिषि देवा आसते ते अधिब्रु

x परावतोयेदिधिषंत आप्यं ०१७२

वंतुनः। विश्वाहिवोनमस्यानिवंद्यानामानिदेवाउतयज्ञियानिवः। येस्थजाताअदितेरद्भ्यस्परियेपृथिव्यास्तेम
इहश्रुताहवं। येभ्योमातामधुमत्पिन्वतेपयःपीयूषंद्यौरदितिरद्रिबर्हाः। उक्थशुष्मान्वृषभरान्स्वप्नसस्तांआ
दित्यांअनुमदास्वस्तये। नृचक्षसोअनिमिषंतोअर्हणाबृहद्देवासोअमृतत्वमानशुः। ज्योतीरथाअहिमायाअ
नागसोदिवोवर्ष्माणंवसतेस्वस्तये। सम्राजोयेसुवृधोयज्ञमाययुरपरिह्वृतादधिरेदिविक्षयं। तांआविवासन
मसासुवृक्तिभिर्महोआदित्यांअदितिंस्वस्तये॥१॥ कोवस्तोमंराधतियंजुजोषथविश्वेदेवासोमनुषोयतिष्ठन॥
कोवोध्वरंतुविजाताअरंकरद्योनःपर्षदत्यंहःस्वस्तये। येभ्योहोत्रांप्रथमामायेजेमनुःसमिद्धाग्निर्मनसासप्त
होतृभिः। तआदित्याअभयंशर्मयच्छतसुगानःकर्तसुपथास्वस्तये। यईशिरेभुवनस्यप्रचेतसोविश्वस्य
स्थातुर्जगतश्चमंतवः। तेनःकृतादकृतादेनसस्पर्यद्यादेवासःपिपृतास्वस्तये। भरेष्विंद्रंसुहवंहवामहेंहो
मुचंसुकृतंदैव्यंजनं। अग्निंमित्रंवरुणंसातयेभगंद्यावापृथिवीमरुतःस्वस्तये। सुत्रामाणंपृथिवींद्यां
मनेहसंसुशर्माणमदितिंसुप्रणीतिं। दैवींनावंस्वरित्रामनागसमस्रवंतीमारुहेमास्वस्तये॥२॥ विश्वेयज
त्राअधिवोचतोतयेत्रायध्वंनोदुरेवायाअभिह्रुतः। सत्ययावोदेवहूत्याहुवेमशृण्वतोदेवाअवसेस्व
स्तये। अपामीवामपविश्वामनाहुतिमपारातिंदुर्विदत्रामघायतः। आरेदेवाद्वेषोअस्मद्युयोतनोरुणः
शर्मयच्छतास्वस्तये। अरिष्टःसमर्तोविश्वएधतेप्रप्रजाभिर्जायतेधर्मणस्परि। यमादित्यासोनयथा
सुनीतिभिरतिविश्वानिदुरितास्वस्तये। यंदेवासोवथवाजसातौयंशूरसातामरुतोहितेधने। प्रातर्यावा
णंरथमिंद्रसानसिमरिष्यंतमारुहेमास्वस्तये। स्वस्तिनःपथ्यासुधन्वसुस्वस्त्यप्सुवृजनेस्वर्वति।

१५ स्वस्ति नः पुत्रकृथेषु योनिषु स्वस्ति राये दधातन॥ स्वस्तिरिद्धि प्रपथे श्रेष्ठा रेक्णस्वत्यभि या वाममेति। सा नो
अमा सो अरणे निपातु स्वावेशा भवतु देवगोपा॥ एवा प्लुतेः सूनुरवीवृधद्वो विश्व आदित्या अदिते मनीषी।
ईशानासो नरो अमर्त्येनास्तावि जनो दिव्यो गयेन॥१७॥ सर्वेषां जपे० एतानि सर्वे गृह्योक्तपिंडानानाविध
संस्कारद्रव्यैः स्वादुभोजनयुक्तगृहसिद्धान्नैः स्वाचारान्ब्राह्मणान्भोजयेत्। ततः स्वस्ति भवंतो ब्रुवंत्विति कर्त्ता
वदेत्। ॐ स्वस्तीति ब्राह्मणा ब्रुयुः॥ ततः कर्त्ता यस्य स्मृत्या सुकृतं कर्म ईश्वराय समर्प्य सुहृद्युक्तो भुंजीते
ति। इति प्रत्यवरोहणं॥ अथ पिंडपितृयज्ञः। तत्राश्वलायनैः स्मार्त्ताग्निमद्भिः संपूर्णदर्शप्रातर्होमोत्तरं
अन्वाधानं कृत्वाऽपराह्णे पिंडपितृयज्ञं दर्शश्राद्धं च व्यतिषंगविधिना कार्यं॥ अथाग्नौ जुहोतीति यथोक्तं पुर
स्तादिति सूत्रव्याख्यानेऽनयोर्व्यतिषंगो लब्ध इति व्याख्यानात्। स्थालीपाकेन सह पिंडार्थमुद्धृत्येति स
व्दृ त्रादिति कमलाकरभट्टलिखनाच्च। दर्शखंडे तु संधिदिने केवलपिंडपितृयज्ञः॥ तथैवाश्वलायनसूत्रस्या
५ रव्या रायणभाष्यस्य वृत्तिभिः व्याख्यानात्। उपदेशमताच्च। कैश्चित्तु वृत्तिकारैः॥ अन्वष्टक्यं च पूर्वेद्युरित्युदाह ग ४
त्य चतुर्थ्यादिषु साग्नीनामित्यनेन पार्वणश्राद्धस्य नियतत्वे स्थालीपाकप्राप्तिसत्त्वात्॥ भाष्यकारप्रयोगपारि
३ क्षिप्राया जाताच्च। पूर्वे हि व्यतिषंगविधिना श्राद्धं विधाय परेद्युः केवलपिंडपितृयज्ञः कर्त्तव्य इति वदंति॥ अन्ये तु सूत्रस्य
दृत्वेध्वसंसृष्टदर्शदिनविषयत्वात्॥ दर्शखंडे संधिदिनात्पूर्वदिने होमोत्तरं अन्वाधायापराह्णे व्यतिषंगरहि
तं पार्वणहोमात्मकं पार्वणश्राद्धं कृत्वा परे हि स्थालीपाकोत्तरं अपराह्णे केवलपिंडपितृयज्ञः कर्त्तव्यः॥ अमा १५

द१ वास्यायामपराह्ल इति प्रतिपत्पंचदश्योः संधिर्मैहोराचापराह्ले पिंडपितृयज्ञः कर्त्तव्यस्त्वोक्तेरेवं पूर्वदिने पिंडपि
तृयज्ञकल्पं प्राप्त्यभावात्॥ कालभेदे न व्यतिषंग इति वदंति॥ पूर्वदिने व्यतिषंगः परदिने केवलपिंडपितृयज्ञ
करणपक्षे तु नाप्यावृत्तिः पिंडपितृयज्ञस्यास्तीति शांखायनसूत्रे पुनः पिंडपितृयज्ञकरणनिषेध इत्यपि॥
आद्ये केवलस्मार्त्ताग्निः खंडपर्वण्यपि न्यायात् पूर्वेद्युर्व्यतिषंगविधिना पार्वणश्राद्धं कुर्यान्नापरेद्युः। पर्व
संधौ अपराह्ले केवलपिंडपितृयज्ञ इति केषांचिन्मतं॥ अस्मिन्विषये अनेकेषु मतेषु सत्स्वपि शिष्टसंप्रदा
यमनुसृत्यैव कर्त्तव्यम्॥ इति पिंडपितृयज्ञकालनिर्णयः॥ अथ प्रयोगः॥ तत्रादावुद्देशे पितृयज्ञदर्श
प्राय: ७ श्राद्धयोः दिनकर्त्तव्यत्वात्। व्यतिषंगेण तयोः प्रयोगः सोत्र पदार्थमात्रोपसंहारेणोच्यते॥ कर्त्ता पूर्वेद्युः सायं
होमोत्तरं द्विराचम्य प्राणानायम्य देशकालौ संकीर्त्य दक्षिणामुखः प्राचीनावीती संबंधनामगोत्रयुक्तं
पितृवर्गं सपत्नीकं तथैव मातामहं सपत्नीकवर्गं च उपवीती पिंडपितृयज्ञसंव्यतिषंगेणश्चोदर्श
श्राद्धे भवितास्तत्र देवतार्थं क्षणः क्रियतामिति यथालिंगं सर्वेषां उद्दिश्य ब्राह्मणान्निमंत्रयेत्॥ श्राद्धदि
ने वा प्रातर्निमंत्रणं॥ ततः प्रातःकृत्यं मध्याह्नकृत्यं च निर्वर्त्य शुचिः प्राङ्मुखः कर्मांगं द्विराचम्य धृत
पवित्रः प्राणानायम्य देशकालौ संकीर्त्याग्नेरभिमुखः प्राचीनावीती दर्शश्राद्धं पिंडपितृयज्ञं च
व्यतिषंगेण करिष्य इति संकल्प्याग्नेय्याग्रैकैर्दर्भैः संपरिस्तीर्याग्नेर्वायव्यामीशान्यां वाग्नेय्याग्र

१६ कौ श्रिकुशानास्तीर्यतेषु चरुस्थालीशूर्पस्फ्योलूखलमुसलस्रुवध्रुवरुद्धाजिनैकैर्यत्नेन छिन्नाः कुशास्त
रसरूहा छिन्नद्वये ध्मेक्षण कर्मंड लूने कै कशाः आग्नेयीसंस्था न्यासादयेत् पात्राणामुत्तानानामेवासादन
मितिकारिकासाध्ये। न्युब्जिलानामिति प्रयोगरत्ने। तथा संकल्पोत्तरमग्निध्यानं परिसमूहनादि चकर्तव्यं॥
तथाजलपूर्णकमंडलुं चासाद्य पात्राण्युत्तानीकृत्य कमंडलुजलेन प्रोक्षणमित्यपि तत्रैव। ततः स्थालीशूर्प
निधायाग्नेर्दक्षिणतोवस्थितं व्रीहिमुष्टिकं दक्षिणत आरुह्य स्थालीशूर्पेनिहितां व्रीहीन् निराकुर्यात् यथाविलक्षेद
राक्षर्षे व्रीहयो निपतंतीति तथा स्थालीशूर्पे निमृज्य शूर्पस्थान्व्रीहीन्दशाकटप्रास्याग्नेः पश्चिमदेशे वायव्य
ग्रीवआस्तीर्णकृष्णाजिने निहितउलूखले निहितान्स्थालीस्थान्व्रीहीन् नाग्नेय्याभिमुख्यापल्यावर्त्य ह ७
सव्यहस्ते लीकृत्या विविच्य प्रक्षालितान्तंदुलान्नोपासनाग्नौ श्रपयेत्। तत्र सकृत्प्रक्षालितान् जीवतंदुलान्श्रपये
दितिप्रयोगरत्नादौ तन्मते जीवतंदुलश्रपणप्रसक्तौ तस्य लक्षणापेक्षायां मैत्रायणीयपरिशिष्टे॥ पुराणाव्री
ह्ययो येषामुसलबीजं प्ररोहति॥ तेभ्यो ये तंदुलाजाता विज्ञेया जीवतंदुलाइति॥ ईषदन्नवक्लिन्नतंदुलमिवेति प ५
रुद्रदत्तः॥ चर्वावस्थायामीषत्तंदुलसद्भाववत्त्स्विन्नविघते ते जीवतंदुलाइति वौडॅभाष्ये॥ ततस्स्रुवमु
त्युद्वास्यैवाग्नेरेकतः प्रदीप्तमुल्मुकमादायाग्नेय्यां॥ येरूपाणि प्रतिमुंचमाना असुरास्संतः स्वधया
चरंति॥ परापुरो निपुरोये भरंत्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात्॥ इतिमंत्रेण प्रणीयतमपि प्रणीताग्निं १६
सर्वकर्म रिस्तीर्यतस्माद्दर्वीकुस्फ्यं नाग्नेय्यभिमुखो अपहता असुरारक्षांसिवेदिषद इतिमंत्रेण

ले खाद्वयं प्रागपवर्गमाग्नेयी संस्थं मंत्रारस्तारुल्लिखेत्॥ स्फ्याभावे कुशमूलेनवेतिकारिकाभाष्ये॥ रेखाक
रणं सव्योत्तराभ्यांपाणिभ्यामिति पित्र्यत्रैव। ततएकैकेन सकृदाछिन्नेन प्रत्येकमाछाद्य अनुत्पूतमाज्यमुत्पू
तं नवनीतं वा ध्रुवायामासिच्य तां ध्रुवामग्नेर्दक्षिणतः कुशेष्वासाद्य स्रुवं गृहीतेन ध्रुवाज्येन चरुमभिघार्योदगुद्वास्या
ग्नेः पश्चाद्दर्भेष्वासाद्य तद्दक्षिणतोभ्यंजनांजनकशिपुबर्हिषि च न्यासाद्य पंचदशदारुकमिध्मं पितृतीर्थेनाग्नि
त्याग्नौ प्रक्षिपेत्॥ इध्म औदुंबरजातीयमरत्निमात्रं चेति प्रयोगरत्ने॥ ततः कर्त्ता बहिः कृतपादशौचान्द्विजा
ये८ बहिराचामयेयुः॥ कर्त्ता द्विराचम्य श्राद्धदेशे पूर्वकल्पितासनेषु दैवोद्वावेकं वा पित्र्यर्थं मातामहाद्यर्थं च त्रयस्त्री त
रान् कृतमौनव्रतीनैकैकं वा ममैते पितर इति ध्यायन् कुशमुखान्नुपवेशयेत्॥ ततः विश्वेदेवार्थं ब्राह्मणानामासना
द्याच्छादनांतं पूजां कृत्वा प्राचीनावीती पित्राद्यर्थं ब्राह्मणहस्तेऽपोदत्वासनार्थं दर्भान्द्विगुणभुग्नान्वामभा
गे प्रक्षिप्य तैजसाद्यश्मजातीयार्घ्यपात्राण्याग्नेयीदिक्संस्थान्यासाद्य दर्भानंतर्धाय तेष्वपोनिषिच्य
तज्जलं शन्नोदेवीरिति सकृदनुमंत्र्य तिलोसीत्यादिकृत्या प्रतिपात्रं तिलानोप्यापवीती स्वधार्घ्या इति
र्घ्यदत्वा५ निवेद्यापोदत्वा गंधमाल्यधूपदीपाच्छादनांतपदार्थान्कांडानुसमयेन पदार्थानुसमयेन वा तेभ्यो दत्वा भोज
नभाजनानि निधाय पितृयज्ञे चरोरनुधृत्य [illegible]ताकृत्वा अग्नौकरिष्ये करवै करवाणीति वा पक्षत्रयमध्ये
न्यतमेन ब्राह्मणाननुज्ञाप्य तैः क्रियतां कुरुष्व कुर्वित्यनुज्ञापनवाक्यानुसारेणाभ्यनुज्ञातोभ्युद्धताच्चरो
र्मेक्षणेनावदानधर्मेणावदाय सोमाय पितृमते स्वधा नमः इति मंत्रेणाग्नौ दक्षिणभागे हुत्वा सोमाय
पितृमत इदं०। ततः पूर्ववद्दक्षिणभागस्थ चरोरवदाय अग्नये कव्यवाहनाय स्वधा नमः इत्यग्नेरुत

र भागे कृत्वाऽग्नये कव्यवाहनायेदमिति युक्तोपवीती तूष्णीं मेक्षणमग्नावनुप्रहृत्य भोजनपात्रेषु श्राद्धीयान्नं परि
विष्य कृतशिष्टं परिविष्टेषु दत्त्वा पुरूरवार्द्रव संज्ञकेभ्यो विश्वेभ्यो देवेभ्य इदमन्नं परिविष्टं परिवेक्ष्यमाणं
चातस्तेः स्वाहा हव्यं न्नमो न मम इति तत्पात्रस्थमन्नं यवोदकेन त्यक्त्वा प्राचीनावीती आग्नेय्यभिमुखोऽस्मत्
पित्रे अमुकशर्मणे अमुकगोत्रायामुकरूपायेदं न मम स्यादि स्वधा कव्यं न मम इति यथालिंगं तिलोदकेन त्यजेत्॥
ततो ब्राह्मणा बलिदानवर्जं भुंजीयुः । तेषु भुंजानेषु स्वयमन्येन वा विहितसूक्तानि पुराणादीन् निश्रावयेत्॥
तृप्ताः स्थ इति प्रश्नोत्तरं मधुवाता इति तिसृभिः अक्षन्नमीमदंत ही चेति श्रावयित्वा संपन्नमिति पृष्ट्वा
तेः संपन्नमित्युक्ते पिंडार्थं प्रकिरणार्थं चान्नमुद्धृत्य शेषमन्नं निवेद्य तैरिष्टैः सह भोज्यतामित्युक्ते उत्त
रापोशने कृते आचांते ष्वनाचांतेषु वाग्नेय्यभिमुखः प्राचीनावीती स्थालीपाकान्नेन सहाद्रीमलकप्र
माणं पिंडषट्कं कृत्वा कमंडलुजलेन शुंधंतां पितरः शुंधंतां पितामहाः शुंधंतां प्रपितामहाः सपत्नी
काः इत्यादि यथालिंगं पूर्वकृतलेखाय पश्चिमापवर्गं त्रिषु स्थानेषु पितृतीर्थेन निषिच्य । एतत्ते
ऽस्मत्पितर अमुकगोत्र अमुकशर्मन् अमुकरूपये चत्साम त्वानुरति प्रकारेण यथालिंगं षट्सु
जलसेचनस्थानेषु पितृतीर्थेन पिंडान्दद्यात् । तत्र अत्र पितरो मादयध्वं । इति पिंडाननुमंत्र्याप्रद यर
क्षिणमुदङ्गावृत्य यथाशक्ति प्राणान्नियम्याभिपर्यावृत्य अमीमदंत पितरो यथाभागमावृषा

पीबतेति पुनरनुमंत्र्योप्य ॥ नस्तोषमवघ्रायाचम्य प्राचीनावीती पुनः शुंधंतां पितर इत्यादिभिर्मं
त्रैः पृथक्पिंडेषु जलं निनीयास्मत्पितरित्यादिअभ्यंक्ष्वेत्येवं यथा लिंगं सर्वत्र तैलमंजनं च दद्यात्
ऊर्जं इति मंत्रेणाद्य तेन वस्त्राण्यलमड्व्यं प्रतिवर्गं दर्भाकशिपूपबर्हणेनिवेद्य नमो वः पितर इत्यादि
संतः स्याम । इति मंत्रांतेन मंत्रेण मनोन्वाहुवामह इति तिसृभिः प्राग्नेय्याभिमुखउपस्थाय
परेतन इति आग्नेय्याभिमुख मुत्तानेन हस्तेन पिंडान्प्रवाहयेत् । ततस्तु श्रीमौपासनसमीपं गत्वा ॥
अग्नेतमद्ये तिमंत्रं यदंतरिक्षमिति गार्हपत्यपदरहितं चेति मंत्रद्वयं जपेत् ॥ अग्नेतमद्याश्वन्नस्तोमैः
क्रतुं न भद्रं हृदिस्पृशं । ऋध्यामात ओहैः ॥ यदंतरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिंसिम ॥
अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुंचतु करोतु मामनेहसं ॥ अग्नेतमद्येत्यनेनौपासनदेशं गत्वा
आग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुंचतु करोतु मामनेहसं ॥
यदंतरिक्षमिति जपेत् ॥ इति प्रयारलं ॥ केचित्तु द्वाभ्यामपि मंत्राभ्यामग्न्युपस्थानमाहुः । ततः
पुत्रकामनया पत्नीवीरं मे दत्त पितर इति मंत्रेण मध्यमपिंडद्वयमं दाय ॥ आधत्त पितरो गर्भं कु
मारं पुष्करस्रजं ॥ यथायमरपा असदिति मंत्रेण पत्नी प्राशये त् ॥ इतरौ द्वौ अप्सु वा प्रणीतेवा प्रक्षि
पेत् ॥ पुत्रकामनाभावे सर्वान् ॥ ततः सव्यं कृत्वा छिन्नं धर्मं क्षणं व्यतिरिक्तान्यवशिष्टानि नवपात्रा
णि हृदयात् उत्सृज्यावशिष्टमेकं तत्पोनस्स होत्सृज्यान्नं प्रकिरेत् ॥ अत्र प्रकिरणस्य अर्चांत

पक्षे वृत्तिकारैराचमनोत्तरकाले विधानात्॥ तथा। अंभोनिनयनाद्यंतं पितृयज्ञं समापयेत्। इति कारि
कावचनाच्च॥ आचांतपक्षे पिपासोत्सर्गांतं पितृयज्ञं समाप्य विकिरदानं। ब्राह्मणानाचमय्य प्रकि
रणार्थमन्नं जलप्लुतं स्वा ब्राह्मणाग्रतउच्छिष्टसमीपेऽन्नं प्रकीर्य प्रथममर्घ्यपात्रमुत्तानीकृत्य उप
वीती शक्त्या सुवर्णमयीं दक्षिणां देवेभ्यो ब्राह्मणेभ्यः पितृभ्यो ब्राह्मणेभ्यो रजतमयीं च दत्वा स्वधो
ॐ ५ च्यतामिति अस्तु स्वधेति ब्राह्मणान्प्रत्युक्ते तैः स्वधेत्यस्तु स्वधेति वा प्रत्युक्ते कांतदिक्षिणामुखः
दातारो नोऽभिवर्द्धंतामित्येन पितृन्प्रति वरान्याचे त। ब्राह्मणान्भुक्तशेषेणान्येन वा वैश्वदेवादि विधाय
इष्टैः सह भुंजीतेति। इति पिंडपितृयज्ञदर्शश्राद्धव्यतिषंगप्रयोगः॥ अथ तद्दिने खंडपर्वणि केवलः पिं
डयज्ञस्तस्य प्रसक्ते केवलस्य प्रयोगः॥ तत्र संधिमद्दहोरात्रे दिनापराह्णे प्राणानायम्य पितृत्वसिद्धारा
२५ श्रीपरमेश्वरप्रीत्यर्थं पिंडपितृयज्ञं करिष्य इति संकल्प्य उपसमाधायाग्नेय्याग्रकैर्दर्भैः संपरिस्तीर्यांगे
रीशान्यां वायव्यां वाग्नेय्याग्रकान्दर्भानास्तीर्य तत्र चरुस्थाली शूर्पे स्फ्यमुलूखलमुसलस्रुवध्रुवक
ष्टा। जिनसकृदाच्छिन्नेध्ममेक्षणकमंडलूनि स्थैकैकशः उत्तानानि न्यग्बिलानि वा पात्राण्याग्नेय्यां सं
स्थाप्यासाद्य स्थालीं शूर्पे निधायाग्नेर्दक्षिणतोऽवस्थितं व्रीहिमच्छकटं दक्षिण आरुह्य स्थालीं शू
र्पे निहितां व्रीहिभिरापूर्यैय प्रवि लपदेशाच्छूर्पे व्रीहयो निपतंति तथा स्थालीं शूर्पे निमृज्य शूर्पस्थान्व्रीहीन्

श कदेशमास्याग्नेः पश्चिमदेशे वायव्यां वा आस्तीर्णे स्वछाजिने निहिते उलूखले निहितान्स्थालिस्थान् व्रीही
नाग्नेय्य त्ति सुख्यापत्न्यावहत्य सरूफलीकृत्यावि विच्य सम्यक्षालितांस्तंडुलान् औपासने श्रपयेत्॥
ततश्चरुमनुद्धास्यैवाग्नेरेकतः उदीप्तमुल्मुकं गृहीत्वा येरूपाणीति मंत्रेणाग्नेय्यां प्रणीयतमतिप्रणीतम
ग्निं पूर्ववत्परिस्तीर्य तस्मादर्वाक् स्फ्येन लेखामाग्नेयसंस्थां उल्लिखेत्॥ अपहता इतिमंत्रेणातां लेखाम
भ्युक्ष्य सकृदाछिन्नेनाछाद्यानुत्पूतमाज्यं विलीनं उत्पूतं नवनीतं वा ध्रुवायामासिच्य तां ध्रुवामाग्नेर्दक्षि
णतः कुशेष्वासाद्य स्रुवं गृहीत्वा तेन ध्रौवाज्येन चरुमभिघार्यादि गुद्धास्याग्नेः पश्चिमतः कुशेष्वासाद्य तद्दक्षिणतोऽप्यं
जनांजनकशिपूपबर्हिण्यान्यासादयेत्॥ ततः प्राचीनावीती पंचदशदारुकमिध्मं पितृतीर्थेन निक्षेप्याग्नौ प्र
क्षिप्य स्रुवेण ध्रुवाज्यमादाय मेक्षणमुपस्तीर्यो स्रुकृताच्चरोरुत्तरभागस्थं अवदानधर्मेण मेक्षणेनादाय
हविरवत्तं चाभिघार्य सोमाय पितृमते स्वधा नम इति मंत्रेणाग्नेर्दक्षिणभागे हुत्वा सोमाय पितृमत इदं॥ पुनर्द
क्षिणभागस्थमवदायाग्नये कव्यवाहनाय स्वधा नम इति मंत्रेणोत्तरभागे हुत्वाग्नये कव्यवाहनायेदमित्युक्त्वो
पवीती तूष्णीं मेक्षणमग्नौ प्रहृत्य पूर्वकृतरेखायां स्थापितकमंडलुजलेन पितृतीर्थेनोप्य पवर्गे शुंधं ग्ने ४
तां पितर इत्यादि त्रिभिर्मंत्रैस्त्रिषु स्थानेषु जलं निषिच्य हुतशेषेण साज्येन त्रीन्पिंडान्कृत्वा एकैकं पिंडं
गृहीत्वा। एतत्तेस्मत्पितरसावित्यादि॥ ०॥ यच्छवामत्रानिति प्रकारेण यथालिंगं त्रिषु संबनस्थानेषु उत्तान
नपाणिना पितृतीर्थेन त्रीन्पिंडान्दत्वा। अत्रपितरो मादयध्वमिति पिंडाननुमंत्र्याप्रदक्षिणमुदङ्ङावस

यथाशक्तिप्राणानन्नियम्य प्रस्थाप्युत्य अमीमदंत॰यीषतेति पुनरनुमंत्र्योपवीती चरुशेषमवघ्रायाचम्य प्राची
नावीती शुंधंतामित्यादि त्रिभिर्मंत्रैः पूर्ववत् पिंडेषु जलं निनीयास्मत्तित इत्यादि अभ्यंक्ष्वेति यथालिं
गं सर्वत्रैतेलं दत्वा एवमेवांक्ष्वेत्येवं सर्वत्रांजनं दत्वा एतद्वः पितर इति अनेन वस्त्राद्यन्यतमद्रव्यं पिंडेषु द
त्वा कशिपूपबर्हणे निवेद्य नमो वः पितर इत्यादिमंत्रैव कारवर्जं संतस्यामेत्यनेन नमो न्वाकुर्वामहे इति ति
सृभिश्च पिंडाननुपस्थाय आग्नेयीमुखे वपरेतनेति मंत्रेणाग्नेयीं प्रति पिंडान्प्रवाहयेत्॥ औपासनाग्न्यं
तिकं गत्वा अग्ने तमद्येति मंत्रेण गार्हपत्यपदं हिरण्यदंतरिक्षमिति च मंत्रं जपेत्पत्नी पुत्रकामा चेत्॥
वीरं मे दत्त पितर इति मंत्रेण मध्यमंपिंडं आदाय आधत्त इति मंत्रेण भक्षयेत्॥ इतरौ द्वावप्सु अग्नि
प्रणीतेवा प्रक्षिपेत्॥ पुत्रकामाभावे सर्वान्॥ ततः सव्यं॥ छिन्ने धर्मेक्ष्वेणाव्यतिरिक्तान्यवशिष्टानि न
वपात्राणि हुत्वा उत्सृज्या वशिष्टं तृणेन सहोत्सृजेत्॥ ततः परिस्तरणविसर्जनमग्न्युपस्थानं च केचिल्लि
खितं तत्कर्तव्यं चेत्कुर्यात् ततःयाब्राह्मणभोजनं संकल्प्य यस्य स्मृत्येत्युक्ता पवित्रग्रंथिं विस्रस्य शुचि देशे
क्षिपेत्॥ इति केवलपिंडपितृयज्ञः॥ अथ पित्रादित्रयाणां नामाज्ञाते तन्मध्ये एकस्य द्वयोर्वा ज्ञाते त
त्नाम स्थाने तत इत्युक्तात्पुत्र पितामह प्रपितामहे तिशब्दाः प्रयोज्याः॥ तत्रापि त्र्यादीनां म
ध्ये एकस्य द्वयोर्वा जीवने पिंडदानकाले पूर्वोक्तमंत्रेण सव्येन स्वाहाकारेण पिंडहोमः॥ त्रयाणाम
पि जीवने पितृमातृ जीवने वा पिंडत्रयस्य होमः॥ यद्वा पिंडरहितः पितृयज्ञः॥ अनारंभस्तस्य

वेति ॥ अन्येपि पक्षाः आकरतो ज्ञेयाः ॥ अत्र श्रपणहोमयोरधिकारणापेक्षायां आपस्तंबसूत्रे तद्व्या
ख्यायां च पक्षद्वयं । औपासने श्रपणहोमौ भवतः ॥ यद्वा औपासने श्रपणम् अतिप्रणीते होम इति ॥ पूर्वपक्षे
अतिप्रणीतस्यादृष्टार्थत्वमिति केचित् । अन्ये तु अतिप्रणीतस्य दृष्टार्थत्वं मत्वा नित्यश्रपणं अतिप्रणीते
होम इति वदंति । अत्रापि शिष्टाचारमनुसृत्यैवानुष्ठानं ॥ आहिताग्निः सर्वाधानी दक्षिणाग्नावेव केवलपिंड
पितृयज्ञं कृत्वा पाणिहोमात्मकं दर्शश्राद्धं कु यादिति सर्वसंमतं ॥ अर्द्धाधानी तु संपूर्णे दर्शे त्रेतायां केवलपिं
डपितृयज्ञं कृत्वा तदुत्तरमौपासनाग्नौ दर्शश्राद्धं पिंडपितृयज्ञं च व्यतिषंगविधिना कुर्यात् ॥ एवं उक्तेपि पक्षे एव ।
दर्शश्राद्धसंकल्पं कृत्वा परेद्युरिष्ट्युत्तरं केवलः पिंडपितृयज्ञ इति वाजसनेयिनः ॥ अनंतदेवीये तूक्तं अर्द्धा
धानिना व्यतिषंगः कर्तव्य इति । प्रयोगरत्ने तु अर्द्धाधानिनापि दक्षिणाग्नौ केवलं पिंडपितृयज्ञं कृत्वा दर्श
श्राद्धं पाणिहोमात्मकं कर्तव्यमित्युक्तं ॥ इति पिंडपितृयज्ञोपयोगी निर्णयः ॥ अथाष्टकाश्राद्धं ॥ तच्च मार्ग
शीर्षादिचतुर्षु मासेषु ये कृष्णपक्षाश्चत्वारस्तेषु याश्चतस्रोष्टम्यस्तास्वष्टकाश्राद्धं कर्तव्यं ॥ तत्पूर्वसप्त
मीषु पूर्वेद्युः सप्तमीश्राद्धं । तदुत्तरं नवमीषु चान्वष्टक्यं ॥ यदि तु चतुर्ष्वपरपक्षगताष्टमीषु कर्तुमशक्त
स्तेनाक्रमासगतापरपक्षेष्वष्टमीनां मध्ये एकस्यामेव वाष्टम्यां कार्यम् ॥ एकस्यां वेति सूत्रात् ॥ हेमंत
शिशिराख्ययोः कृष्णपक्षचतुष्टये अष्टमीष्वथवैकस्याम् अष्टम्यामष्टका भवेदिति कारिकोक्तेः ॥
इदमष्टकाश्राद्धं अष्टम्यां कार्यम् ॥ तदनुरोधेन पूर्वेद्युः श्राद्धमन्वष्टक्यं च कार्यं । एवं अपराह्णे तु वकु

अपराह्णव्यापिन्यां ९

अत्र प्रथमप्रयोगेपि नाभ्युदयिकश्राद्धं। नाष्टकासु भवेच्छ्राद्धं न श्राद्धे श्राद्धमिष्यते। इति सर्वत्रं धेपि द्वि ष्टवच
२० नात्। एतेनैव व्यतिषिक्तपितृयज्ञे नाभ्युदयिकं। तथा केवलपितृयज्ञस्य संस्थांतर्गतत्वेपि न। तस्य प्रारंभादौ
सर्वैरप्यलिखनात्। अथ प्रयोगः। षष्ठ्यां सायंहोमानंतरं सप्तम्यामेव वा प्रातर्होमानंतरं वा शुचिः कर्मांगद्
राचम्य पवित्रपाणिः प्राचीनावीती दक्षिणामुखो देशकालावुल्लिख्य दर्भान् नामगोत्ररूपयुक्तान् पित्रादी
५ ता न्सपत्नीकान्मातामहादींश्च सपत्नीकान् षष्ठ्यां नंतरं ह्युपवीती नित्यविधिरूपं अष्टकाश्राद्धं कर्तुकामः
पिंडपितृयज्ञव्यतिषंगेण च पूर्वेद्युः श्राद्धं स्वोपवितात तत्र देवार्थं क्षणः क्रियतामिति द्वौ विकल्पं वा देवार्थं प्राची
नावीती पित्र्यर्थे क्षणः क्रियतामित्यादि यथा लिंगं पित्रादित्रयार्थं ब्राह्मणान्निमंत्र्य तथा मातामहार्थं
च निमंत्रयेत्। सप्तम्यां निमंत्रणोत्तं नित्यविधिरूपं श्च अष्टकाश्राद्धं कर्तुकामः पिंडपितृयज्ञव्यतिषंगे
णाद्यपूर्वेद्युः श्राद्धं स्वपवितेति विशेषः॥ अन्यत्पूर्ववत्॥ ततः श्राद्धदिने कृतमध्याह्निकः शुचिः प्राङ्मुखः क
र्मांगं द्विराचम्य पवित्रपाणिः प्राचीनावीती आग्नेय्यभिमुखः स्वोष्टकाश्राद्धं कर्तुमद्य पूर्वेद्युः श्राद्धं क
रिष्य इति संकल्प्याप समाधायाग्नेयाग्रकेदर्भैरग्निं परिस्तीर्याग्नेरीशान्यां वायव्यां वाग्नेयाग्रकान्
ली १ दर्भानास्तीर्य तेषु स्थालीत्रय शूर्पस्फ्योलूखलमुसलस्रुवध्रुवकृष्णाजिनसवदार्वैद्य हृदये ध्मम् त २
क्षणकमंडैनिति पात्राणि प्रवृत्तिवदासाद्य शूर्पं चादायाग्नेर्दक्षिणतो वस्थितं व्रीहिमच्छकटं दक्षिणेन
तू २ रुद्धा स्थालीत्रयं शूर्पे निधाय व्रीहिपूरणादि स्थाल्यां मुखतः पतितानां व्रीहीणां शकटोपरि क्षेपणांतं

कृत्वा जिनमास्तीर्य तस्मिन्नुलूखलं कृत्वा स्थालीत्रयगतव्रीहीन्सर्वान्पत्न्या उलूखले ओप्यावहत्य स
र्वान्व्रीहीन् शूर्पे प्रक्षिप्य युगपत्सकृत्फलीकृत्या विविच्य पात्रांतरे तंदुलान्सकृत्प्रक्षाल्य यथाभागं स्था
लीत्रये ओप्य तत्स्थालीत्रयं क्रमेण नित्याग्नौ संस्थाप्य द्वितीयस्थालीस्थचरोः श्रपणावस्थायां तस्यां
तिलकल्कं प्रक्षिप्य श्रृते वोद्धृत्य तिलमिश्रणं कुर्यात्। एवं शुद्धोदनं कृसरं पायसं चेति हविस्त्रयं श्रपयि
त्वा तद्धन्नुद्वास्यैवोल्मुकनिधीदिधुपायाज्यं कृत्वैस्यं तं कृत्वाह विस्त्रयं क्रमेणाभिघार्योदगुद्वास्य नित्या
ग्नेः पश्चिमतः क्रमेणाग्नेयी संस्थमासाद्य तद्दक्षिणतोभ्यंजनांजनाद्यासादनादि इध्माधानांतं कुर्या
त्। ततो ब्राह्मणपादप्रक्षालनाद्याच्छादनांतं कृत्वा भोजनभाजनान्यासाद्य चरुत्रयं पात्रांतरे पृथक्
उद्धृत्य घृताक्तं अग्नौ करिष्य इति अनुज्ञावाक्यानुसारेण पित्र्यब्राह्मणाननुज्ञाप्य तद्वाक्यानुसारेण
ब्राह्म(णै)रनुज्ञातो ध्रौवाज्येन मेक्षणमुपस्तीर्य शुद्धोदनं मध्यादंगुष्ठपर्वमात्रं मेक्षणेनावदानधर्मे
णावदाय पूर्वार्द्धादप्यवदाय कृसरात्पायसाच्चैवमेवावदाय पात्रस्थं क्रमेणाभिघार्यावत्तं चैकवारम
भिघार्य प्राक्तनमंत्रयोः स्थाने उदीरतेत्यष्टाभिश्चतुर्दशभिर्वा स्वधानमोंतैर्जुहुयात्। उदीरता
मिष्टर्चस्य शंखः पितरस्त्रिष्टुप्। पूर्वे जुहोमि वि०।। उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्या
सः। असुं य ईयुरवृका ऋतज्ञास्ते नोवंतु पितरो हवेषु स्वधा नम इति मेक्षणेन हुत्वा पुनश्चरुत्रया
दवदाय। इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः।। ये पार्थिवे रजस्या निषत्ता ये

सप्तसंस्था

वा नूनं सुदृजनासु दक्षुः स्वधा ० अहं पितॄन्त्सुविदत्राँ अवित्सि नपातं च विक्रमणं च विष्णोः । बर्हिषदो ये स्वधया
२१ सुतस्य भजंत पित्वस्त इहागमिष्ठाः स्वधा ० बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वं ॥ त आगता
वसा शंतमेनाथानः शंयोररपो दधात न स्वधा ० उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ॥ त आग
मंतु त इह श्रुवंत्वधिब्रुवंतु तेऽवंत्वस्मान्स्वधा ० आच्या जानु दक्षिणतो निषद्य मेमं यज्ञमभिगृणीत विश्वे । मा हिं
सिष्ट पितरः केन चिन्नो यद्व आगः पुरुषता कराम स्वधा ० आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे
मर्त्या ◯ य ॥ पुत्रेभ्यः पितरस्तस्य वस्वः प्रयच्छत त इहोर्जं दधात स्वधा ० येनः पूर्वे पितरः सोम्यासो नूहिरे सो
मपीथं वसिष्ठाः । तेभिर्यमः संरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु स्वधा नमः ॥ एतैर्ये पाकाम्नं कुर्वीत सर्वत्र
पितृभ्य इदं न मम इत्युद्देशात्यागो वक्तव्यो यज्ञोपवीती मेक्षणमनुप्रहृत्य पाण्युपस्पृश्य कृताव शिष्ट चरुत्रय
परिवेषणं । दर्शपूर्णमासवनीतं कृत्वा चरुत्रयं शेषं पिंडार्थमुद्धृत्य तेष्वन्नेषु प्रक्षिप्य शेषं निवेदनादि विप्रविस
र्जनांतं सर्वं स्यात दर्शवत्पार्वणश्राद्धवत्यस्य सपत्नीकस्य श्राद्धाभिमतं तिलतर्पणं वा पार्ववन्नियमेन दिनत्रो
षं नयेत् ॥ अत्राष्टमीश्राद्धे एव श्राद्धोत्तरं तिलतर्पणं कार्यं ॥ सप्तम्यन्वष्टक्योस्तु अमाश्राद्धवच्छ्राद्धांते मा
सपूर्वमेव तर्पणमित्यनंतदेवीये उक्तं ॥ एवमाहिताग्निनाष्टका करणौधानिना औपासने उक्तवि २९
।धिना अष्टका कार्या ॥ सर्वाधानिना तु शालाग्नावेव अन्वष्टक्यांते एवमाहिताग्नेरौपासनाभावे

रणालाग्नौभवतीति।अनंतदेवीयेजयंतवचनात्।शुक्लरुताधानप्रयोगेसर्वाधानिनंप्रतिज्ञाखोप
दनव्यवस्थोक्ता।नित्यहोमस्तुश्रौतेस्मार्तेचेस्युपक्रम्यस्मार्तसंस्थालसवस्येवसर्वाधानिनालौ धा २
किकाग्नौआश्वलायनेस्तुकर्मणिकर्मण्येनंपुनःपुनःसंस्कृत्याहरंतीतिबोधायनगृह्ये॥स्थाली
पाकप्रकरणेवृत्तिकृतोक्तेश्चेति॥प्रयोगरत्नेतुआहिताग्निनानिमंत्रणप्रभृतिआछादनांतंकृत्वा
दक्षिणाग्नौहविःश्रपणंहविरासादनंचकृत्वाब्राह्मणानुज्ञापनादिसर्वमनाहिताग्निवत्कुर्यादित्यु
क्तं॥एवंहविस्त्रयपक्षमुक्त्वाचतुःशरावस्यवापूपानित्यनेनापूपाख्यहविषःप्रसक्तौअपूपलक्ष
णंमिताक्षरायां॥अस्नेहपक्वोगोधूमविकारोऽपूपइति।अतोऽपूपामंडकाइतिद्व्यानंतदेवीये।अपूपाः
पिष्टमयाःचतुरोंत्रीवपरिमितधान्यस्यपेषणंकृत्वातत्पिष्टेनलौकिकाग्नाववनिष्पाद्याः।तेषांलौकिका
ग्निनिःसिद्धान्नमेवोपादानमितिवृत्तिकारः।शरावइतिपुरुषाशनपरिमाणेवर्त्ततइतिजयंतः।अस्मि
कल्पेपात्रासादनकालेशूर्पोलूखलमुसलदृषदुपलाजिनानांनिवृत्तिः॥अथैतदुपयोगीप्रयोगः॥संक
ल्पप्रभृतिपात्रासादनार्थदर्भास्तरणंकृत्वाअपूपस्थालीस्रुचंध्रुवसदृदाच्छिन्नेध्मेक्षणाज
लपूर्णकमंडलूंश्चेसासाद्यअपूपस्थाल्यांलौकिकाग्निसिद्धान्नपूपान्निधायातिप्रणीतानिधा
नादिध्रुवायामाज्यंकृत्वेसंतंकृत्वासर्पिर्ग्रहणपक्षेअपूपानांशास्त्रोक्तरमाप्ताधिश्रयणरूपसं
स्कारंकृत्वानवनीतोत्पवनपक्षेतस्योत्पवने कृतेयत्किंचिद्दर्भमुद्धृत्यमादायतेनकमंडलु

२२ जलेनकर्मंडलुजलाभावेन्यजलेन वास्थालीपूर्णां त्रिः प्रोक्ष्यानिस्याग्नेः पश्चिमतोनिधायेत्यादि इध्मापसमा
धानांतं कुर्यात् । अपूनामधिश्रयणरूपसंस्कारं कुर्यादित्युक्तमनंतदेवीयपि । एतस्य पक्षे अपूपस्थाली
मग्नौनिधायाभिघार्योदगुद्वास्ययादितः अग्रेणपश्चोत्यादि भोजनभाजननिधानांतं सर्वा अपूपेभ्य उद्ध
त्य घृताक्तं सर्वामेकरूपेनावदानधर्मेणावदाय प्राकृतमंत्रयोः स्थानेऊहीरतामिष्टानि जुहुयात् । इ
ति सप्तमीश्राद्धप्रयोगः । अथप्रधानभूतमष्टकाकर्म । इदंचपूर्ववत्स्थालीपाकपूर्वं वा कार्यं पशौरभावेस्था
लीपाकः प्रवर्त्तत इति वृत्तिकृद्वचनात् । अष्टकाश्राद्धप्रयोगः । प्रायः कारिकाभाष्यानुसारी लिख्यते । तत्र
सप्तम्यां सायंहोमोत्तरमष्टम्यां प्रातर्होमोत्तरं श्वोष्टकाश्राद्धं कर्तुं ब्राह्मणान्निमंत्रयेत् । स्थालीपाकसमा
प्त्युत्तरं अष्टकासंकल्पोत्तरं निमंत्रणमित्यनंतभट्टाः । अष्टम्यांश्राद्धकालात्प्रागेव शुचिः कर्मांगं द्विरा
म्यतीर्थं प्रक्षिप्ये । पासनस्य पश्चाद्दर्भेष्वासीनो दर्भान्धारयमाणः प्राणानायम्य देशकालौ वकुकीर्त्याष्ट
काश्राद्धांगभूतं स्थालीपाकं करिष्य इति संकल्प्य चक्षुष्पंते विश्वान्देवान्सप्तवारं चरुद्रव्येण शेषेण
त्यादि ० समिद्द्वयमग्नावाधाय परिसमूहनादि शूर्पपवित्रनिधानांतं कृत्वा तस्मिन्पवित्रे अष्टाविंश
ति मुष्टीः स्तुस्तुः निरूप्य तावत्कारं तूष्णीमेव प्रोक्ष्यावहननाद्याज्यभागांतं कृत्वा मत्स्याहुति स्वर
स्थालीत एवावदानधर्मेण चरुमवदाय अग्ने नयेति मंत्रद्वयेन स्वरमुक्तपाठेन श्रीम्भादि वलुर्भिर्मे २२

त्रे रेकस्रुवाप्त्रिते: प्रजापतिमंत्रेणास्वरसहितेन होमं कुर्यात्। अग्ने नयेति मंत्रद्वयस्यागस्त्योग्निस्त्रिष्टुप्॥
अष्टकांगस्थालीपाकहोमे वि० अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्। युयोध्यस्म
ज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम स्वा० अग्ने त्वं पारया नव्यो अस्मान्स्वस्तिभिरति दुर्गाणि वि
श्वा॥ पृश्च पृथ्वी बहुला न उर्वी भव वाता कायतनपाय शंयोः स्वाहा०। ग्रीष्मो हेमंत ऋतवः शिवा नो वर्षाः शि
वा अभया शरन्नः। संवत्सरोधिपतिः प्राणदो नो अहोरात्रे कृणुतां दीर्घमायुः स्वाहा। शांता पृथिवी शिवमं
तरिक्षं द्यौर्नो देव्यभयन्नो अस्तु। शिवा दिशः प्रदिश उद्दिशो न आपो विद्युतः परिपांतु विश्वतः स्वाहा। आ
पो मरीचीः प्रवहंतु नो धियो धाता समुद्रो वहंतु पापं। भूतं भविष्यद् भयं विश्वमस्तु मे ब्रह्माधिगुप्तः स्वारा
प्राणि स्वाहा। विश्व आदित्या वसवश्च देवा रुद्रा गोप्तारो मरुतः सदंतु। ऊर्जं प्रजाममृतं पिन्वमानः प्रजा
पतिर्मह्यं परमेष्ठी दधातु स्वा०। प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्। अष्टकांगस्थालीपाकहोमे०
प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव॥ यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम प
तयो रयीणां। स्वा०। एवं सहाहुतीर्हुत्वा सर्वत्र विश्वेभ्यो देवेभ्य इदं न ममेति उद्देशत्यागौ दत्त्वा स्विष्ट
कृदादि होमशेषं समाप्य प्रधानभूतमष्टकाश्राद्धं कुर्यात्॥ कृती कृतमाध्याह्निकः शुचिः प्राङ्मुख ८
कर्मांगं द्विराचम्य पवित्रपाणिराग्नेयीमुखः प्राचीनावीती प्राणानायम्य देशकालावनुकीर्त्य दर्शव
न्नामगोत्ररूपयुक्तान्पित्रादीन् सपत्नीकान् मातामहादींश्च सपत्नीकान् षष्ठ्यंतानन्नत्वनित्य विधिरूपं

23 प्रधान भूतमष्टकाश्राद्धं करिष्य इति संकल्प्य पूर्ववन्नामगोत्राद्युच्चार्य अद्य अष्टकाश्राद्धं प्रवर्तिता तत्र कामकाल
संज्ञक विश्वेदेवार्थे क्षणः क्रियतामिति द्वौ ब्राह्मणौ एकं वा देवार्थं निमंत्र्य पित्र्यर्थे क्षणः क्रियतामित्याद्युक्त्वा पूर्व
कं अष्टकं सं स्वयं निमंत्र्य पादप्रक्षालनाद्याच्छादनांतं कृत्वा भोजनपात्राण्यासाद्य श्राद्धीय पात्रादन्नमुद्धृत्य
घृताक्तं कृत्वाभिघार्य ब्राह्मणपाणिषु मंत्रद्वयेन पाणिहोमं कृत्वा श्राद्धीयमन्नं परिविष्य हुतशेषं ब्राह्मणोपरिष्टाद्वे पाणिषु ४
ष्वन्नेषु दत्वा ब्राह्मण भोजनादि संपन्न वचनांतं कृत्वा पिंडार्थं प्रकिरणार्थं चान्नमुद्धृत्य ब्राह्मणसमीपे रेखाद्वयमु
ल्लिख्य पिंडदानादि प्रवाहणांतं कृत्वा अन्नमवनीये अग्ने तमद्य यदंतरिक्षमिति मंत्रद्वय जपवर्जं दातारो नोभिव
र्द्धंतां० इत्यंतं श्राद्धशेषं समाप्य तदहरेव सपत्नीकस्य वर्गद्वयस्य तिलतर्पणं कुर्यात् पुत्रकामनया पत्न्या वर्गद्वयम
ध्यमपिंडं प्राशयेत् अत्र पिंडदानोत्तरं सूत्रवरोलणवस्त्रस्यसयनं कुर्यादिति पक्षांतरमुक्तं रत्नौ। तत्करणपक्षे पिंड
प्रवाहोत्तरं। ॐ स्वस्ति भवंतो ब्रुवंत्विति कर्ता वदेत्। ॐ स्वस्तीति ब्राह्मणाः प्रतिब्रूयुः। ततः शेषं समापयेत्। इति
कारिकाभाष्यानुसारी अष्टकाश्राद्धप्रयोगः। अत्राष्टकांगहोमोक्तमंत्रेषु प्रतिमंत्रमनेकदेवता अतस्तासामन्वा
धाने प्रत्येकं निर्देशः श्रीअनंतदेवैर्लिखितस्तल्लिखितप्रकारेण कर्तव्यं चेत्तदपि प्रयोगरूपं लिख्यते। अन्वा
धाने चक्षुष्यंतमुक्त्वा अग्निं द्विवारं अग्ने नयेत्यृग्द्वयेन क्रमेण वरुणाग्नी ग्रीष्महेमंत ऋतवर्षाः शरदं
संवत्सरं अधिपतिं अहोरात्रं। ग्रीष्मो हेमंत इत्यृचा वरुणा पृथिवीं अंतरिक्षं द्यां देवीं। दिशः। प्रदि
शः। उद्दिशः। अपः। विद्युतः। शांता पृथिवीत्यृचा वरुणा। अपः। मरीचीः। धातारं। समुद्रं। भूतं। भविष्यत् ३

विश्वं। ब्रह्माणं। आपो मरीचीरित्यृचा चरुणा। विश्वान्देवान्। आदित्यान्। वसून्वा देवान्। रुद्रान्। गोदृहन्।
मरुतः। प्रजापतिं। परमेष्ठिनं। विश्व आदित्येत्यृचा। चरुणा। प्रजापतिं प्रजापतेः इत्यृचा। चरुणाय
क्ष्य॥ शेषेणस्वादि। स्वगेपि। प्रथमद्वितीययोः अग्नय इदं। तृतीये। ग्रीष्मायहेमंताय ऋतुभ्यो वर्षा
भ्यः शरदे संवत्सराय। धिपतये अहोरात्राभ्यामिदं। चतुर्थे पृथिव्या अंतरिक्षाय दिवे दिग्भ्यः उदि
ग्भ्यो द्युभ्यो विद्युत्भ्य इदं। पंचमे अद्भ्यो मरीचिभ्यो धात्रे समुद्राय ऋताय सविष्यते विश्वस्मै ब्रह्मण
इदं। षष्ठे विश्वेभ्यो देवेभ्य आदित्येभ्यो वसुभ्यो देवेभ्यो गोदृहेभ्यो मरुद्भ्यः प्रजापतये परमेष्ठिन
इदं। सप्तमे प्रजापतय इदं। इति मंत्रोक्त सर्वदेवतानां विविच्य प्रयोगः। अत्राष्टका चतुष्टये क्रमेण
ऐंद्र्यां तु प्रथमायां च शाकैः संतर्पयेत्पितॄन् निरूपकं मांसापूपैस्तिद्रव्यत्रयं तिसृष्वष्टकासु
चतुर्थ्यां तु पुनः शाकद्रव्यमेवेति यथासंख्यं। द्रव्यभेदस्तथा ऐंद्र्यादि देवताभेदश्च ब्रह्मपुराणा
द्यालः। तथापि आश्वलायन व्यतिरिक्त विषयस्तेषां पंचद्याणां देवतानां भेद एवेति व्यवस्थापि
तं तत्समस्तं ग्रंथे॥ अथान्वष्टक्यं॥ तत्र प्रतिपार्वणं नवावरा ब्राह्मणाः भोज्याः। अशक्तौ सप्त प
च त्रय एको वा॥ तत्र नवपक्षे एकैकस्य देवतस्य त्रयस्त्रयः। सप्तपक्षे एकैकस्येकतरयोस्तिस्रः
इति॥ पंचपक्षे एकस्य त्रयः इतरयोः एकैकः॥ त्रयपक्षे त्रयाणामप्येकैकः। एकपक्षे देवतात्रयस्य
एक एवेति वृत्तिकृज्जयंतौ। तत्र जयंतमते सप्तपक्षे विशेषः। सप्तपक्षे पित्रादि द्वितयस्य त्रय

वरणीयास्तत्तृतीयस्य तु एकए वा त्राशिष्यतेर् इति । इदं चान्वष्टक्यं एवेति हेति रूमतं । पूर्वेद्युः प्रभृति भुज
यंतमर्त । अष्टम्यां सायंहोमानंतरं नवम्यामेव प्रातर्होमोत्तरं वा सुचिः प्राङ्मुखो द्विराचम्य दर्भपा
णिः प्राणानायम्याग्नेयीमुखो देशकालावनुकीर्त्य प्राचीनावीती इदं वन्नामगोत्ररूपयुक्तं पितृव
र्गं मातृवर्गं सपत्न्यष्ट्वे नत्सहितमिति वाक् पैपिपद्धं स्यात् लिखनात् । एवं स्पष्टपकुमातृवर्गं पत्नीसहि
तं मातामहवर्गं च दृश्यंतं निर्दिश्य पिंडपितृयज्ञकल्पातिदेशेन अन्वष्टकाश्राद्धं भविता नवम्यां चेद्द्या
न्वष्टकाश्राद्धं भविता तत्र देवार्थं क्षणः क्रियतामिति द्वावेकं वा देवार्थं निमंत्र्य प्राचीनावीती पित्रार्थं
क्षणः क्रियतामिति पित्रादीनामर्थं एवं मात्रादीनां मातामहादीनामित्यादि यथालिंगं नव सप्त
पंचैकपक्षानुसारेण ब्राह्मणान्निमंत्र्य श्राद्धदिने प्रातः पूर्वं श्राद्धोपयोगि सर्वं संपादयेत् । अग्न्युपसमा
धानार्थं दक्षिणाप्रवणे देशे तत्रेषुमात्रं स्थंडिलं च परिकल्प्याग्नेः परिश्रयणार्थं कटादिकं यवस
क्तून्मधुदधि च मांसस्य स्थाने लवणमिश्रं पायसं चेति संपाद्य श्राद्धकाले सुस्नातः प्राङ्मु
खः कर्मांगं द्विराचम्याग्नेयीमुखः प्राणानायम्य देशकालौ संकीर्त्यान्वष्टक्यं श्राद्धं करिष्ये इति
संकल्प्य निरग्निः प्रत्यक्षत आनीयमानश्चेच्छरावादावग्निमादाय पत्न्यारब्धो यजमानः प चा २
त्नीचोभौ श्वासनिरोधं कृत्वाग्निर्नेयः । यदि चिकीर्षितस्थलपर्यंतं निरोधं कर्तुमशक्यस्तदा २४

ग्निसहितशरावं भूमौ निधाय पुनः श्वासनिरोधेनैव नेयः। अध्वयदि समारोपिताग्निर्नीयमानस्तदा
रोपित [illegible] समिधं गृहीत्वा तथा स्पृष्ट यजमानेनैव नेयः। पक्षद्वयेपि दक्षिणाप्रवण देशोपरिवृ
तस्थंडिलं तिकं नीत्वा तत्र होष्यधर्मसंस्कारयुक्तस्थंडिले प्रस्य धूममभ्यासमग्निं स्थापयेत् समारोपि
तश्चेदुक्तसंस्कारयुक्तेस्थंडिले लौकिकमग्निं प्रतिष्ठाप्य प्रत्यवरोहण निहत्याग्निस्थसिद्धिं कृत्वाग्निमु
पसमाधाय तमग्निं कटादिभिः परिश्रित्योत्तरेण द्वारं कृत्वा नवापरिश्रयणं। ततः समूलं बर्हिर्गृहीत्वा
ग्नेयीमारभ्य प्रदक्षिणं अप्रकंपयन् आग्नेयीपर्यंतं त्रिरग्निं परिस्तीर्य प्रकृतिवत्साश्रा सादनार्थं दर्भा
नास्तीर्य तेषु चरुस्थालीत्रयं तत्सहितं दधिमंथमधुमंथार्थ पात्रद्वयं शूर्पं स्फ्योलूखलमुसलस्रुवस्रु
व कृष्णाजिन सकृच्छिन्नत्रये ध्मे मेक्षणपाज लपूर्णकमंडलूनि तिप्रकृतिवदासाद्य स्थालीत्रये क्रमेण
व्रीहिहरणादि तंदुलप्रक्षालनांतं सतमीवत्कृत्वा तंडुलान्यथाभागं स्थालीत्रये प्रक्षिप्य तेषु यावदपेक्षितं जलं
प्रक्षिप्य शुद्धोदनस्थाल्यां किंचिद्दधिकं तत आग्नेयीसंस्थं स्थालीत्रयं निधाय हवींषि श्रपयेत्॥ श्रप
णकाले एव शुद्धोदनस्थालीगतः पात्रांतरेणोदनाग्रद्रवं मंडाख्यमादाय तद्देवायामसंज्ञे पात्रांत
रे प्रक्षालितं निदध्यात्। पूर्वमासादितपात्रद्वये यवकृत पिष्टरूपं सक्तूं प्रक्षिपेत्॥ अनंतद्वितीययवं धाना
न्भर्जितसक्तूनिति प्रथमे दधि प्रक्षिप्यापरपात्रे मधु च प्रक्षिप्य तद्द्वयं मिश्रणेन दधिमंथमधुमं
थं च संपाद्याग्निमति प्रणीय तमग्निं समूलबर्हिषाग्निवत्परिस्तीर्य दधिमंथमौपासनाग्नौ अधि

२५ मधुमंथस्याप्यधिश्रयणमिति भाष्ये। ततअपहता इति मंत्रावृत्त्या रेखात्रयं पश्चिमापवर्गं आग्नेयीसंस्थमुल्लि
खेत्॥ अथवा कर्षू्ध्वे करतिवैकल्पिकस्त्रोक्तपक्षाश्रयणेनोक्तमंत्रेण पश्चिमापवर्गमायतमवटद्वयं परिमंड
लाकारं भवटषट्कं वा कुर्यात्। अस्मिन्पक्षे मातामहार्थमवटपश्चिमे रेखां कुर्यात्। उभयपक्षे सकृदाछिन्नान
प्रत्येकमाछाद्य ध्रुवायामाज्यं स्त्वा दक्षिणात आसाद्य स्त्रुवेण ध्रुवाज्यं गृहीत्वोदनादित्रयं मधुमंथं चेति हवि
पंचकं प्रत्येकमभिघार्य दक्षुदास्थानिस्वाग्नेः पश्चिमतो दर्भेष्वाग्नेयीसंस्थक्रमेण निधाय आंजनादीनि तद्दक्षि
त आसाद्य कशिपूत्रयं उपबर्हणत्रयं चासादयेत्। ततइध्मोपसमाधानं कृत्वा ब्राह्मणपक्षेऽप्युदपित्र्या ब्राह्म चा६
णानामासनदानाद्युत्तरजलदानांतं कृत्वार्घ्यविशेषः। पित्रादिवर्गत्रयस्य प्रत्येकं पात्रत्रयं तैजसाद्येकजाती
यं अर्घ्यार्थमासादयेत्॥ तत्र मातृद्वित्वे बहुत्वेवापि तामही प्रपितामही द्वित्वे बहुत्वे वा यैर्द्वित्वं बहुत्वं तद्देवत्य ८
पात्रेणासह देवतासंख्यया पात्राण्याग्नेयी संस्थान्यासाद्य तेषु प्रत्येकं दर्भपवित्रं निधाय तेष्वपो निषिच्य शन्नो
.५ रि देवीति तत्स्या त्रस्थजलं स्वकृदनुमंत्र्य तिलोसीत्यूनहेन मंत्रावृत्त्या प्रतिपात्रं तिलान्प्रक्षिप्य गंधादिक्षिप्रदि
प्याप वीती स्वधार्घ्याइति प्रत्येकमर्घ्यपात्राणि निवेद्य पितरिदं तेर्घ्य मित्यादि मातरिदं तेर्घ्यं मातामहेदं तेर्घ्य
मित्येवं यथालिंगं वर्गत्रयदेवतानां अर्घ्यं दत्वा कांडानुसमयेन पदार्थानुसमयेन वाछादनांतं सर्वेषां पूजां क
त्वोदनादिपक्षद्धतुर्णां मध्ये मधुमंथवर्जं पूर्वलाकं कृत्वा प्रकृतिवद्ब्राह्मणाननुत्ताप्य तेरप्यनुज्ञातो। २५
ग्नावाहुतिद्वयं हुत्वाउपवीती मेक्षणमनुप्रहृत्य आछीयान्नं परिविष्य हविः प्रलुप्य हुतशेषं पित्र्य ब्राह्मणपा

जने भुक्त्वान्नस्याग्रादि शेषनिवेदनांतं कृत्वा चह विश्वचतुष्टयादेकस्मादाकृतिद्वयं गृहीत्वा ताभ्यामेवमं
त्राभ्यां होतव्यमिति । अस्मिन्पक्षे ऽष्टाहुतयो भवंति । तिकारिकायां तन्नाप्येव केषांचिन्मतं । ततः पिंडार्थं
चि । केरार्थं च सर्वस्माद्भुक्तशेषान्नादुद्धृत्य स्थाली चतुष्टयस्थ हविश्चतुष्टयं सर्वमधुमयं पात्र प्रक्षिप्य
शेषनिवेदनोत्तरं बर्हिष्षु प्रत्यगपवर्गं सतिलजले शुंधंतां पितरः शुंधंतां पितामहाः शुंधंतां प्रपितामहाः
शुंधंतां मातरः शुंधंतां पितामह्यः शुंधंतां प्रपितामह्यः सपत्न्यश्च शुंधंतां सापत्नमातरः शुंधंतां मातामा
हाः सपत्नीकाः शुंधंतां मातुः पितामहाः सपत्नीकाः शुंधंतां मातुः प्रपितामहाः सपत्नीकाः इति नवमंत्रैः
पर्व ऋतरे स्वात्रय अवटे वा स्तृत बर्हि स्त्रिषु स्थलेषु अवटपक्षे प्रस्तवट स्थल त्रयेषु वर्तुलपक्षे पिंड स्थवद
स तिल जले निनियनं दत्वास्म पितः देवदत्तशर्मन् अमुकगोत्रामुकरूप ये च त्वामत्रानु । अस्मत्पितामहेत्या
दि यथा लिंगं पितृवर्गस्य पिंडान्दत्वास्मन्मातः यज्ञदे अमुकगोत्रे अमुकरूपे ये च त्वामत्रान्विति पिंडं दत्वा एवं पि
तामही प्रपितामहीनामपि प्रत्येकं पिंडदानं दत्वा मातामहवर्गस्यापि पूर्ववत् पिंडदानं कुर्यात् ॥ यद्येवं मातरौ
स्यातां बह्व्यो वा स्युः तदा एतद्वामस्मन्मातरौ यमुना सरस्वती दे अमुकगोत्रे अमुकरूपे ये च त्वामत्रानु ॥
इति द्विले । बह्वीषु तु एतद्वोस्मन्मातरः गंगा यमुना सरस्वती दाः अमुकगोत्राः अमुकरूपाः ये च त्वा
मत्रानु ॥ इति वृत्तिवृन्मतं कारिकामतं च ॥ प्रयोगरत्नकाराणां मतं तु । एतद्वामस्मन्मातरौ यज्ञदे श्री
दे अमुकगोत्रे वसुरूपे ये च युवामत्रान्विति पिंडं दत्वा । अस्मन्मातृभ्यां यज्ञदा श्रीदाभ्यां वसुरूपाभ्यां

२६ अयं पिंडः स्वधा नमो न मम । तेभ्यश्चगयास्यां निक्षुपेदन्नमस्त्विति ॥ बहुत्वे एतद्वः यज्ञदे श्रीदे रुद्रदे अमुक
गोत्राः वसुरूपाः येच युष्मानत्रान्विति पिंडं दत्वा अस्मन्मातृभ्यः यज्ञदाश्रीदा रुद्रदाभ्यः अयं पिंडः स्वधान
मो न ममेत्यादि पूर्ववत् । पितामही प्रपितामही द्वित्वे बहुत्वे वा यत्र्योमते पूर्ववद्यथायोग्यं ज्ञेयं ॥ मातृद्वयोर
पि मात्रोः समानमेव नाम भवति तदेव नाम द्विवचनांतं वक्तव्यं ॥ यदा बहूनि तदा बहुवचनं ॥ यथा एत
द्वाम अस्मन्मातरौ रुद्रदे अमुकगोत्रे वसुरूपे येच त्वामत्रानुरतिद्वे । एतद्वो अस्मन्मातरः यज्ञदाः अमुकगो
त्राः वसुरूपाः येच त्वा मत्रान्विति प्रयोगरत्नोक्तपक्षे तु पूर्वलिखितप्रकारे ज्ञेयं ॥ अत्र मातृवर्गे दे
वतात्रयमध्ये यदि द्वित्वबहुत्वं वा तदेवतासंख्यया अर्घ्यवत्पिंडदानं कर्तव्यमिति मतांतरमनंतदेवीये ॥
ततः अत्र पितरो मादयध्वं यथाभागमावृषायध्वमित्यनूहेन सर्वपिंडानां सव्येन अनुमंत्रणं कृत्वा सव्यावृदुदङ्ङावृत्या
ऽभिपर्यावृत्य अमीमदंतेति चानूहेन सव्येनानुमंत्र्य उपवीती चरुशेषमवघ्राय आचम्य पूर्ववत् सतिलजलैः
शुंधंतां पितर इत्यादिमंत्रैः पितृवर्गपिंडेषु जलं निनीय मातृवर्गपिंडेषु शुंधंतां मातरः शुंधंतां पि
तामह्यः शुंधंतां प्रपितामह्य इत्यनूहेन पृथक् शुंधंतां सापत्नमातर इत्येतैर्मंत्रैः पूर्ववत्सतितमंडारव्या
मोचाम्भं सुरास्थानीयं लवणमिश्रं पायसं वा निषिच्य । शुंधंतां मातामहाः सपत्नीका इत्यादिमंत्रैर्मा ततः
तामहवर्गपिंडेषु सतिलजलं निषिच्य अभ्यंजनादि दद्यात् ॥ अस्मत्पितः देवदत्तशर्मन् अमुक २६
गोत्रामुकरूप अभ्यंक्ष्वेति तैलं दत्वा एवं पितामहादौ अस्मन्मातः यज्ञदे अमुकगोत्रे वसुरूपे

अभ्यं ध्वेति। एवमुत्तरयोर्यथा लिंगं मातामहादीनामप्येवमेव। मातृ द्वित्वेपि तामही प्रपितामही द्वि बहुत्वे वा
अस्मन्मातरौ यज्ञदत्ते श्रीदे अमुकगोत्रे वसुरूपे अभ्यंजाथां। बहुत्वे अभ्यंजध्वं। अंजन दाने। स्मन्मा
तः गोत्ररूपे अंक्ष्व। द्वित्वे स्मन्मातरौ अंजाथां॥ बहुत्वे स्म मातरः अंङ्ध्वं। मात्रादीनां द्वित्व बहुत्वे
एकत्वे एकनामत्वे पूर्वोक्तपिंडदानप्रकारेण ह्यार्य अभ्यङ्ध्वं। अभ्यंजाथां॥ अङ्ध्वं। अंजाथामिति य
थार्थं कृत्वा मन्त्रास्तूपबर्हणं प्रत्येकं वर्गत्रयस्य दत्वा एतद्वः पितर इत्यत्र पितृशब्दानूहितेनाद्यतेन मन्त्रेण प
र्गत्रयस्य वस्त्रा द्यन्यतमदुर्वंद्‌त्वा नमो वः पितर इष इत्यनूहेमनोन्वाहुवामह इत्याद्येन्वानूहेन सर्व
देव पिंडानुपस्थाय परेतनेत्यनेनानूहितेन युगपत्सर्वेषां प्रवाहणं कृत्वा उपास्स नाग्न्येतिकं गत्वा अग्ने
तमद्य यदंतरिक्षमिति च गार्हपत्यपदरहितं मध्यमपिंडत्रयं प्राश्य कर्तापात्रोत्सर्गं कृत्वा पूर्वमर्घ्यपात्रं
न्युब्जीकृतं तदुत्तानीकृत्य उपवीती विसर्जनादिपवित्रग्रंथिं विस्रस्य प्रविश्य द्वारे। क्षिप्रा चम्यतदहरेव
पितृमातृवर्गस्य सपत्नीकस्य मातामहवर्गस्य च तिलतर्पणं कुर्यादिति॥ इत्यन्वष्टक्यश्राद्धप्र
योगः॥ समासं स्थालीपाक पूर्वकमष्टकाकर्म॥ अपैतुस्यानुष्ठानासंभवेन्नु कल्पास्ते च सूत्रव्
याकृताः॥ अप्यनडुहो यवसमाहरेत्॥ उक्ताभावेनडुहो यवसं तृणं॥ अग्निना वा कक्षमुपोषेत्॥
ये १

२७ एतस्याप्यसंभवे अग्निना कक्षदहनं कक्षं तृणं एषा एवाष्टकेति ॥ पवसदाने कक्षदाने च एवं मनसा ध्याये दित्यर्थः । अपि वा नूचानेभ्य उदकुंभमाहरेत् ॥ अपि वा श्राद्धमंत्रान् अधीयीत । अत्र पूर्वालाभे उत्तर
पक्षाश्रयः लाभे अपि इत्येवं ॥ यदि ऋतुद्वये कर्तुमशक्तस्तेन माघ्या उपरिष्टादष्टम्यां त्र्यहसाध्यं
कर्तव्यं ॥ तथा तिथित्रये पि कर्तुमशक्तस्तेनाष्टम्यामेव वाष्टकाश्राद्धं कर्तव्यम् ॥ उपरिष्टान्माघ्याः
पौर्णमास्याः अपरपक्षस्य सप्तम्यामष्टम्यां नवम्यामिति क्रियतां अपि वाष्टम्यामेवेति कारिकाभाष्ये
बोधायनवचनात् ॥ अमुकल्पाद्यविधानीय वचनमनंतदेवीये ॥ एतन्निर्धुं त्रिजपेन्मंत्रं शतवारं तु
तद्दिने ॥ अन्वष्टक्यं यदाशक्तस्त्यं संपूर्णयातिसर्व इति ॥ इदं प्रायश्चित्तमिति प्रयोगरत्ने ॥ इत्यनुक
ल्पाः ॥ एतज्जीवत्पितृकेणाप्यवश्यं कार्यं ॥ अन्वष्टक्यं गयायात्रायां सप्तम्यां च मृतेहनि ॥ मातुःश्राद्धं
सुतः कुर्यात् पितर्यपि च जीवतीति अनंतदेवीये ॥ अष्टकात्रकरणे मैत्रायणीयपरिशिष्टात् ॥
अथान्वष्टक्यविकृतिभूतं माघ्यावर्षश्राद्धं तच्च भाद्रपदापरपक्षे महालयाख्ये सप्तम्यादित्रिषु हः
सु अष्टकावत्सर्वं कुर्यादिति वृत्तिकृत्प्रयोगरत्ने ॥ अनंतदेवीये तु आश्वलायनशाखिभिर्वा
ष्टकाशब्देनोह संकल्पः कार्यः ॥ माघ्यावर्षे करिष्य इति संकल्प्य सर्वोप्यष्टकाविधिः का २७

सप्तसंस्था
२८

सप्तसं०

(२१)

॥ सप्तसंस्थाप्रयोगाः ॥

२८

ताम२

यीइति ॥ हरदत्तस्तु तत्रैव पक्षे मघायुक्तायां त्रयोदश्यां स्तोकल्पविधानेन माध्यावर्षाख्यं श्रा
द्धमित्याह ॥ इदं माध्यावर्षश्राद्धवर्जं सपत्नीकपितृमाहामहवर्गद्वयस्यान्वष्टक्यवत्सुरावाम
वर्जं सर्वं कार्यं ॥ इत्यपरपक्षे श्राद्धप्रयोगः ॥ वृत्तिकादिकाम्यश्राद्धं वृत्तिकारमतेन अष्टमीश्राद्धव
त्सर्वं कार्यं ॥ यद्वा शौनकोक्तरीत्या वृद्धिश्राद्धवत् ॥ इति काम्यश्राद्धं ॥ इति श्रवणाकर्मादिघृष्टकांतानां
सप्तपाकयज्ञसंस्थानां अन्वष्टक्यविकृतिभूतमाध्यावर्षादिश्राद्धानां च प्रयोगः ॥ प्रयोगरत्नप्रयोगास्व ग ५
ल्पज्ञानवतां श्रौतकर्मज्ञानरहितानां अतिगहनाः ॥ अतस्तेषामनुष्ठानसौकर्यार्थं मंदबुद्धिमतामस्मदन्ना
नां त्राव्रतवार्त्तीवत्संस्थाप्रयोगो लिखितः ॥ श्रीमदापदेवसूरिसूनुनानंतदेवेन कृतः सप्तपाकयज्ञसंस्था
प्रयोगः समाप्तः ॥ छ ॥ शके १८०४ चित्रभानुसंवत्सरे वैशाखशुक्लषष्ठ्यां गुरावार्द्रक्षे [illegible] धृति योगे
[illegible] खेडुलकरस्थ पंचभाई उपनामक जन्नाथभट्टात्मजशंकरेणेदं लिखितं सप्तसंस्थापुस्तकं ॥
॥ ॥ श्रीवृषभध्वजो जयति ॥ श्रीसदाशिवो जयति ॥ ॥ ॥ ॥ छ ॥ ॥ ॥ ॥

[OrderDescription]
,CREATED=30.12.19 14:01
,TRANSFERRED=2019/12/30 at 14:16:14
,PAGES=57
,TYPE=STD
,NAME=S0002416
,Book Name=M-2427-SAPTAMCHAND PRAYOG
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF

FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,